SAHITYA

ACHARYA Ist YEAR
Paper - IV, Part - B

# AUCHITYAVICHARACHARCHA

*( Aditaha - Santharasouchityam yavath )*

## Directorate of Distance Education

Rashtriya Sanskrit Vidyapeetha
Tirupati - 517 507 (A.P.)

# विषयानुक्रमणी


| क्र. सं. | विषयाः | पु.सं. |
|---|---|---|
| 01 | प्रस्तावना02-04 | |
| 02 | प्रथमोऽध्यायः | 05-18 |
| 03 | द्वितीयोऽध्यायः | 19-32 |
| 04 | तृतीयोऽध्यायः | 33-45 |
| 05 | चतुर्थोऽध्यायः | 46 - 63 |


•••

# प्रस्तावना

**क्षेमेन्द्रस्य परिचयः –**

वाङ्मयजगति यथा केषाञ्चिदाचार्याणां जन्मदेशकालादिविषये प्रामाण्याभावादभ्यूह एवाश्रियते, तथैव क्षेमेन्द्रविषयेऽपीत्यैतिहासिकनिर्णयः। तथापि बाह्याभ्यन्तरप्रमाणैः ईशद्वा सत्यत्वमत्र साधयितुं शोधपटुभिः कश्चिदुद्यमो विहितः। तत्कृतिमूलतया एवं विनिश्चीयते यत् क्षेमेन्द्रस्य विद्यागुरुषु साहित्यशास्त्रदेशिकाः अभिनवगुप्ताचार्याः निजवैदुष्यमहसा प्रथितदिगन्तकीर्तयः। इमे काश्मीरदेशीयाः। पुनस्तदाश्रयदातारः काश्मीरमहाराजाः अनन्तभूपतयः। अभिनवगुप्ताचार्याः दशमैकादशशतमानमध्यवर्तिनः। अनन्तस्य राज्यपालनं 1028-1036 वर्षावधिकमिति निश्चितम्। एवं क्षेमेन्द्रस्य लब्धप्रामाण्यदिशा अवलोकयामश्चेत् 990-1066 इत्ययं जन्ममृत्युकाल इति आचार्य पुल्लेल श्रीरामचन्द्रुडुमहाशयानां विनिश्चयः। काश्मीरदेशे सुसम्पन्नभूसुरान्वये लब्धजन्मायं कविः निजकृतिषु (दशावतारचरिते बोधिसत्त्वावधान- कल्पलतायां च) स्वीयवंशपरम्पराम् इत्थं प्रकारेण सन्दर्शयामास। यथा –

काश्मीरदेशनरेशस्य जयापीडस्य अमात्यः नरेन्द्रः। तदीयपुत्रः भोगीन्द्रः, भोगीन्द्रपुत्रः सिन्धुः, सिन्धुतनयः प्रकाशेन्द्रः, प्रकाशेन्द्रपुत्रौ क्षेमेन्द्रः चक्रपालश्च। क्षेमेन्द्रस्य पुत्रः सोमेन्द्रः एवंक्रमेण क्षेमेन्द्रस्य वंशावलिरास्ते।

बहूनामाचार्याणाम् अन्तेवासितामवाप्य क्षेमेन्द्रः नैकशास्त्रेषु कृतमतिः समजनि। साहित्यशास्त्रगुरवः अभिनवगुप्ताचार्याः,यानयं "बोधवारिधिः,आचार्यशेखरमणिः" इत्यादिविशेषणैः स्तुतवान्। वैष्णवधर्मे अभिनिवेशार्थं भागवतोपदेशकः सोमपादः, उपाध्यायगङ्गकः, देवधरोऽप्यस्य गुरवः। एभ्यः भौतिकपारलौकिकविज्ञानविद्यादिकं

समुपार्जितवानयम्। भगवतो बादरायणस्य परमभक्तः सन् सम्पूर्णभारतस्य सङ्ग्रहात्मिकां भारतमञ्जरीं प्रणिनाय। तेनायं **व्यासदासः**इति बिरुदनाम्ना सर्वस्तुतिपात्रमभवत्।

**क्षेमेन्द्रस्य ग्रन्थसम्पत्तिः-**

नानाशास्त्रेषु अवहितमतिना क्षेमेन्द्रेण निजप्रतिभावैभवपुरस्सरं सर्वोपकारि-ग्रन्थसन्ततिः बहुधा व्यधायि। प्रायशोऽस्य ग्रन्थप्रणयनसमयः एकादशशतमानस्य प्रथमद्वितीयचरणाविति विमर्शकमतम्। ग्रन्थराशिरस्य कियानित्यस्मिन् विषयेऽपि इयता कालेन समालोचकैः न कश्चिदपि एकाभिप्रायः प्राप्तः। तथापि अस्येति निर्णीतग्रन्थेषु इमे ग्रन्थाः अप्रकाशिताः वा अनुपलब्धाः वेति निश्चेतुं शक्यन्ते।

ते यथा– अमृततरङ्गः, अवसरसारः, कनकजानकी, कविकर्णिका, क्षेमेन्द्रप्रकाशः, चित्रभारतम्, दानपारिजातम्, नीतिकल्पतरुः, पद्यकादम्बरी, पवनपञ्चाशिका, मुक्तावली, मुनिमतमीमांसा, राजावलिः, ललिलरत्नमाला, लावण्यवती, वात्स्यायनसूत्रसारः, विनयवल्ली, वेतालपञ्चविंशतिः, शशिवंशः।

इमे तु विविधप्रकाशनैः प्रकाशिताः साम्प्रतमुपलभ्यमानाश्च सन्ति। ते यथा– औचित्यविचारचर्चा, कलाविलासः, कविकण्ठाभरणम्, चतुर्वर्गसङ्ग्रहः, चारुचर्या, दर्पदलनम्, दशावतारचरितम्, देशोपदेशः, नर्ममाला, बृहत्कथामञ्जरी, बौद्धावदानकल्पलता, भारतमञ्जरी, रामायणमञ्जरी, व्यासाष्टकम्, समयमातृका, सुवृत्ततिलकम्, सेव्यसेवकोपदेशः।

“लोकप्रकाशः” इत्यस्य ग्रन्थस्य कर्तृत्वविषये इयता कालेन कोऽपि निश्चयः न सञ्जातः। तथापि क्षेमेन्द्रग्रन्थेषु केचिदेनं अन्तरभावयन्। एवं क्षेमेन्द्रस्य प्रकाशिताप्रकाशितग्रन्थाः षट् त्रिंशत्सम्मिताः(36) सन्ति।

एवमेतेषु ग्रन्थेषु औचित्यविचारचर्चा, कविकण्ठाभरणम्, सुवृत्ततिलकम् इत्येते त्रयः ग्रन्थाः साहित्यशास्त्रविषयकाः सुप्रसिद्धाः सन्ति। साहित्यशास्त्रस्य षट् सम्प्रदायेषु

अन्यतमस्य औचित्यसम्प्रदायस्य प्रतिपादकः ग्रन्थः औचित्यविचारचर्चा इत्ययमेव वर्तते। अस्मिन् ग्रन्थे काव्यस्य सप्तविंशत्यङ्गेषु(27) औचित्यं व्यापितया स्थिरं जीवितं भवेदिति उदाहरणप्रत्युदाहरणमुखेन सुविशालः विचारः समुपस्थापितः।

अस्य ग्रन्थस्य आरम्भतः शान्तरसपर्यन्तो भागः भवतां पाठ्यांशत्वेन विनिर्दिष्ट इति हेतोः, तावतो ग्रन्थभागस्य यथोचितं सुखावबोधार्थं महता प्रयत्नेन व्याख्यानं मया व्यधायि। मन्येऽहं व्याख्यानादस्मात् भवन्तः उपकृताः भवन्तु इति।

**पाठ्यांशनिर्माता**

**डॉ. सीहेच्. नागराजु,**

**सहाचार्यः, अनुसन्धानप्रकाशनविभागः।**

**मार्गशीर्षशुक्लैकादशी,**

**तिरुपतिः।**

●●●

# औचित्यविचारचर्चा – प्रथमोऽध्यायः

## संरचना

1.1 प्रस्तावना

1.2 उद्दिष्टाधिगमविशेषाः

1.3 मङ्गलाचरणम्

1.4 रसजीवितभूतौचित्यविचारः

1.5 औचित्यस्वरूपम्

1.6 काव्यशरीरप्राणभूतौचित्यविचारः

1.7 पदौचित्यम्

1.8 पदगतमनौचित्यम्

---

## 1.1 प्रस्तावना

अस्मिन् प्रथमाध्याये आचार्येण क्षेमेन्द्रेण स्वकीयस्य औचित्यम्प्रदायस्य विषये ग्रन्थादौ या भूमिका निर्मिता, तया सह पदगततया तेन प्रतिपादिताम् औचित्यस्य अनौचित्यस्य च विवेचनामपि सव्याख्यानं परिशीलयामः।

---

## 1.2 उद्दिष्टाधिगमविशेषाः

- काव्यस्यात्मा रसश्चेत् रसस्यापि प्राणः औचित्यमिति तथ्यं स्फुटं विज्ञायते।
- गुणालङ्कारादिकाव्याङ्गानामपि औचित्यपरतया निबन्धः श्रेयानिति निश्चीयते।
- औचित्यस्य लक्षणं विविच्यते।
- केषु केषु काव्याङ्गेषु औचित्यं व्यापितया स्थिरं जीवितं स्यादिति प्रतिपाद्यते।
- पदगतत्वेन औचित्यमनौचित्यञ्च किमात्मकमिति सोदाहरणं समधिगम्यते।

---

## 1.3 मङ्गलाचरणम्

**कृतारिवञ्चने दृष्टिर्येनाञ्जनमलीमसा।**

**अच्युताय नमस्तस्मै परमौचित्यकारिणे।।1**

**व्याख्या**-प्रस्तुतमारब्धुमीप्सितस्य ग्रन्थस्यास्य निर्विघ्नपरिसमाप्तिं कामयमानः, शिष्यानां शिष्टाचारप्रवृत्तिनिदर्शकश्च तत्र भवान् महामतिः क्षेमेन्द्रः स्वाभीष्टदेवता-नमस्कारात्मकं मङ्गलमाचरति। 'कृतारि'- येन = विष्णुना, अरिवञ्चने = शत्रूणां प्रतारणे, दृष्टिः = नयनयुगली, अञ्जनमलीमसा = कज्जलकलुषिता,कृता = सम्पादिता, परमौचित्य-कारिणे = निरतिशयौचित्यपरिपोषकाय, (दैत्यवञ्चने समुचितमोहीनीरूपस्त्रीवेषधराय इति भावः), तस्मै = विश्वविख्याताय, अच्युताय= कदाचिदपि औचित्यादस्खलितव्यवहाराय विष्णवे, नमः = प्रणामः इति सुगमार्थः।एवमेतेन प्रस्तुतग्रन्थस्य औचित्यविचारात्मक-वस्तुनिर्देशोऽपि कविना संसूचितः। 1

| |
|---|
| प्र. मङ्गलाचरणमिदं किमात्मकम्? कस्य चात्र स्तुतिः कृता ? |
| उ.................................................................... |
| ...................................................................... |

## 1.4 रसजीवितभूतौचित्यविचारः

**कृत्वापि काव्यालङ्कारां क्षेमेन्द्रः कविकर्णिकाम्।**

**तत्कलङ्कं विवेकञ्च विधाय विबुधप्रियम्।।2**

**औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।**

**रसजीवितभूतस्य विचारं कुरुतेऽधुना।।3**

**व्याख्या-** प्रकृतग्रन्थस्य विवेच्यवस्तु निर्दिशत्यत्र ग्रन्थकृत्। काव्यस्य उपमारूपकाद्यलङ्कारप्रतिपादिकां कविकर्णिकां एतन्नामकं ग्रन्थं विधायापि, सम्पाद्यापि (अत्र काव्यालङ्कारामित्यत्र व्यधिकरणगर्भितबहुव्रीहिः समासः)।असन्तुष्टस्वान्तः सन् पुनः काव्यदोषनिरूपकं अथवा कविकर्णिकादोषपरिमार्जकं काव्यकलङ्कनामकं निबन्धविशेषं, काव्यलक्षणकारणादिनिरूपकं अथवा वस्तुतत्त्वविवेचकं काव्यविवेकनामकं ग्रन्थविशेषमपि प्रणीय (एतद्ग्रन्थद्वयलेखनसमये काव्ये अलङ्कारा एवात्मस्थायिका इति निश्चितिर्ममासीत्। परन्तु तेषामेव सूक्ष्मानुशीलनेन काव्ये सर्वोपनिषद्भूतमौचित्यमेवेति पार्यन्तिकी बुद्धिर्मे जातेति क्षेमेन्द्रस्य मनोभावोऽत्र व्यज्यते।) स्थिरनिश्चित्या रसास्वाददशायां विच्छित्तिविशेषविधायकस्य काव्ये रसस्यापि जीवातुभूतस्य (एतेन रसादीनामप्यौचित्यापेक्षया गौणता सूच्यते। सर्वतः प्राधान्यन्तु औचित्यस्यैव, यत इदमन्तरा रसेऽपि रसनीयत्वासम्भवात्।) औचित्यस्य वक्ष्यमाणलक्षणस्य काव्यात्मतत्त्व-भूतस्य विद्वज्जनप्रीतिभाजनं (अनेन सामान्यपण्डितम्मन्यजनानां प्रीत्यजनकत्वेऽपि न कापि हानिरिति ध्वन्यते)।विचारमालोचनमाधत्ते।(अत्र 'कुरुते' इति क्रियापदस्य यशोलाभादिरूपक्रियाफलस्य कर्तृगामित्वादात्मनेपदित्वमुचितमेव)। 2-3

**काव्यस्यालमलङ्कारैः किं मिथ्यागणितैर्गुणैः।**

**यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते।।4**

**व्याख्या-** अलङ्कारादिभ्य औचित्यस्य प्राधान्यं निर्दिशति। यस्मिन् काव्ये सर्वातिशायिप्राणस्वरूपभूतस्य औचित्यस्य विचारेऽपि न क्वापि स्थितिः संलक्ष्यते, तादृशनिरौचित्ये काव्ये यद्यलङ्काराः सुपरिपोषिताश्चेदपि निरर्थकाः जायन्ते। तथैव वृथाटोपेन संख्याधिक्यबुद्ध्या गणितैः सुप्रसिद्धैः गुणैश्च किम्?न किञ्चिदपि प्रयोजनमेतैर्जायत इत्यर्थः। एवमासमन्तात्काव्यस्य सर्वाङ्गीणविच्छित्तिविधायके

असत्यौचित्ये किमितरेषां गुणालङ्काराद्यङ्गाणां उपस्थित्या परिपोषणेन वा प्रयोजनमिति ब्रूमः। न किञ्चित् कदाचिदिति निष्कर्षः। 4

**अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।**

**औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।।5**

**व्याख्या-** अलङ्कारगुणाद्यङ्गेभ्यो विशिष्टं यदङ्गि तदौचित्यं काव्यस्य नियतं प्राणतत्त्वमित्यवधारयति। शब्दार्थयुगलं तावत्काव्यशरीरम् इति वचनात् काव्यस्य इदमुभयमपि शरीरम्। एतदुभयनिष्ठत्वेन अलङ्काराः प्रर्यवसिताः। पुनश्च श्रुतसत्यशीलतोदारतादिगुणा इव माधुर्यप्रसादादयः काव्यगुणा अपि सदा केवलमन्तश्शोभाहेतवो भवन्ति।परन्तु रसात्मभूतस्य कविव्यापारनिष्पन्नस्य काव्यस्य औचित्यमेकमेव सुविनिश्चितं प्राणतत्त्वं भवतीत्यत्र न क्वापि संशीतिः। अतोऽत्रावसेयमिदं यद्रसादिसम्पृक्तस्य काव्यस्य औचित्यमन्तरा न किञ्चित् तादृक् धर्मवत्तरं तत्त्वान्तरमस्तीति।5

**वृत्तिः- परस्परोपकारकरुचिरशब्दार्थरूपस्य काव्यस्योपमोत्प्रेक्षादयो ये प्रचुरालङ्कारास्ते कटककुण्डलकेयूरहारादिवदलङ्कारा एव, बाह्यशोभाहेतुत्त्वात्।येऽपि काव्यगुणाः केचन तल्लक्षणविचक्षणैः समाम्नातास्तेऽपि श्रुतसत्यशीलादिवद् गुणा एव, आहार्यत्वात्।औचित्यं त्वग्रे वक्ष्यमाणलक्षणं स्थिरमविनश्वरं जीवितं काव्यस्य, तेन विनास्य गुणालङ्कारयुक्तस्यापि निर्जीवत्वात्। रसेन श्रृङ्गारादिना सिद्धस्य प्रसिद्धस्य काव्यस्य धातुवादरससिद्धस्येव तज्जीवितं स्थिरमित्यर्थः।**

**व्याख्या-** उपर्युक्तश्लोकार्थमाबृम्हयति। अर्थप्रतीतौ परस्परमुपकुर्वाणयोः शब्दार्थयोः सुभगसमुदायस्वरूपस्य कविकर्मणः काव्यस्य उपमोत्प्रेक्षादयः ये च प्राचुर्येन लक्षणकृद्भिः

संलक्षितास्ते कटककुण्डलहारकेयूरादिवदाभूषणप्राया एव स्युः। यतः शब्दार्थवपुष्मतः काव्यस्य बाह्यशोभाजनकाःइति हेतोः। पुनर्ये च श्रुतसत्यशीलतोदारतादिगुणाः यथा मनुष्यस्य मनुजतां सन्दीपयन्ति, तथैव माधुर्यप्रसादादयो गुणाः काव्यस्य अन्तर्धर्मास्सन्तः शोभामभिवर्धयन्ति।पूर्वसूरिभिराचार्यैः गुणाः बहुधा समाख्याताश्चेदपि गुणगुणिनोर्भेद-बुद्धिप्रसिघ्या कथमपि आत्मस्थायितां नापद्यन्ते। अतस्ते आहार्यमात्रावस्थायिनः पर्यवसीयन्ते।

परन्तु ग्रन्थेऽस्मिन् प्राधान्येन प्रतिपाद्यविषयत्वेनोपस्थितम्, अग्रे वक्ष्यमाणलक्षणं काव्यस्य स्थिरमविनश्वरं प्राणतत्त्वमौचित्यमित्यत्र नाभ्यसूया कृतधियाम्। यतस्तेन प्राणतत्त्वेन औचित्येन असंयुताः गुणालङ्काररसरीतिवृत्तिध्वनिप्रभृतिकाव्यधर्माः कदापि स्वस्वरूपपदवीमाप्तुमनर्हाः स्युः।सत्सु अमीषु औचित्यमेकमेव काव्यमुज्जीवयितुं क्षमम्। करुणादिरससमायुक्तस्य काव्यस्य धातुवादरससिद्धस्येव स्थिरं शश्वज्जीवितमौचित्यमेवेति आकूतिः।

**उक्तार्थस्यैव स्वरूपमाह-**

**उचितस्थानविन्यासादलङ्कृतिरलङ्कृतिः।**
**औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणाः।।6**

**वृत्तिः- अलङ्कृतिरुचितस्थानविन्यासादलङ्कर्तुं क्षमा भवति, अन्यथा त्वलङ्कृतिव्यपदेशमेव न लभते।तद्वदौचित्यादपरिच्युता गुणा गुणतामासादयन्ति अन्यथा पुनरगुणा एव।**

**व्याख्या-** पूर्वाभिहितमर्थमेव पुनर्विवृणोति। यथा कटककुण्डलहार-केयूराद्याभरणजातं कण्ठकर्णाद्युचितस्थानेषु विनिहितं चेदतीव चारुतां जनयति, तथैव

अनुप्रासोपमादयः अलङ्काराः तत्तदुचितस्थानेषु प्रयुक्ता एव अलङ्कारत्वधर्ममापद्यन्ते। न चेत् तेषां अलङ्कारता मृषैवेति निश्चयः। पुनर्मनुष्यस्य औदार्यदाक्षिण्यसौजन्यादि-गुणसम्पत्तिः समुचितप्रकारेण तत्तदवस्थासु अनुभूता यथा आत्मोत्कर्षम् आदधती गुणत्वं न विमुञ्चति, तथैव माधुर्यप्रसादादिकाव्यगुणाः करुणशान्तादितत्तदुचितरसेषु प्रयुक्ताश्चेदेव गुणतां भजन्ते। वीरबीभत्सादिपरुषरसस्थाने माधुर्यादिसुकुमारगुणानां प्रयोगे गुणत्वहानिः ध्रुवा। एवं इतरत्राप्यभ्यूह्यम्। अतस्समुचितस्थानोपनतगुणानां गुणत्वधर्मविद्रवो न स्यादित्येव फलितांशः।

**यदाह-**

**कण्ठे मेखलया नितम्बफलके तारेण हारेण वा,**
**पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।**
**शौर्येन प्रणते रिपौ करुणया नायान्ति के हास्यता-**
**मौचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणाः।।**

**व्याख्या-** पूर्वोक्तस्यार्थस्य निदर्शनार्थं श्लोकमुपस्थापयति। लोके काचिदबला नारी विवेकशून्यबुद्ध्या अलङ्कार्यस्थानेषु अलङ्काराननुपन्यस्य कथमुपहासभाजनं स्यादिति प्रसङ्गमुद्धरति ग्रन्थकृत्। कण्ठे हारं विना मेखलाम्, कटितटे मेखलामन्तरा तारं हारम्, करयुगे केयूरवलयं विना नूपुरबन्धनम्, चरणयोः नूपुरराजिमन्तरेण केयूरमालाञ्च दधती काचिदविदग्धा योषिदुपकण्ठं समाजस्य महान्तमुपहासभारमावहति।

तथैव कश्चिदविवेकी जनः शरणागते विनते शौर्यं, रिपुसमवाये दयाञ्च दर्शयन् प्रतरां विबुधवचोऽभिहतो भवन् आत्मन्यपमानग्लानिमनुभवति। एवं काव्येऽपि औचितीसनाथाः

गुणाः,अलङ्काराः सर्वेऽपि स्वस्वसत्तया काव्यमुद्दीपयन्ति। तदन्तरा शवशरीरोद्वर्तनमिव काव्यस्य गुणालङ्काराणामपेक्षा निस्सारा स्यात्।

प्र. पूर्वं क्षेमेन्द्रेण रचिताः त्रयः ग्रन्थाः के ?

उ.........................................................................................

.........................................................................................

प्र. रससिद्धस्य काव्यस्य जीवितं किम् ?

उ.........................................................................................

प्र.अलङ्काराःगुणाश्चकीदृशाः?

उ .........................................................................................

.........................................................................................

## 1.5 औचित्यस्वरूपम्

**किं तदौचित्यमित्याह-**

**उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।**
**उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।।7**

**वृत्तिः-यत्किल यस्यानुरुपं तदुचितमुच्यते, तस्य भावमौचित्यं कथयन्ति।**

**व्याख्या-** यदितःपूर्वं काव्यस्य जीवातुभूतं तत्त्वमौचित्यमित्युक्तम्, किं वा तदीयं दोषत्रितयविनिर्मुक्तं लक्षणमिति चोदुच्यते । यस्य वस्तुनः यद्वस्तु सर्वात्मना अनुरूपं तदुचितमिति काव्यशास्त्रकोविदाः निराहुः। तस्य उचितस्य भावो वा कर्म वा औचित्यमिति कथ्यते। लोके याथार्थ्येन द्वयोर्वस्तुनोरनुरूपं यत्किञ्चित् सादृश्यमनुभूतञ्चेत् तदौचित्यपदेन व्यपदिश्यते। यथा वसन्ते सहकारविकासः, कोकिलरावः इत्यादि। वसन्तकाले सम्प्राप्ते

सहकारपल्लवाशी पिकः मधुरं रौति। एवं वस्तुद्वयस्य समाश्रये यत्र सहजता, सरलता च स्फुरति तदौचित्यमिति भाव्यम्। 7

| |
|---|
| प्र. औचित्यस्य लक्षणं किम् ? |
| उ ............................................................................................................ |
| ............................................................................................................ |

## 1.6 काव्यशरीरप्राणभूतौचित्यविचारः

**अधुना सकलकाव्यशरीरजीवातुभूतस्यौचित्यस्य प्राधान्येनोपलभ्यां स्थितिं दर्शयितुमाह-**

**पदे वाक्ये प्रबन्धार्थे गुणेऽलङ्करणे रसे।**
**क्रियायां कारके लिङ्गे वचने च विशेषणे।।8**
**उपसर्गे निपाते च काले देशे कुले व्रते।**
**तत्त्वे सत्त्वेऽप्यभिप्राये स्वभावे सारसङ्ग्रहे।।9**
**प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि।**
**काव्यास्याङ्गेषु च प्राहुरौचित्यं व्यापि जीवितम्।।10**

**वृत्तिः- एतेषु पदप्रभृतिषु स्थानेषु मर्मस्विव काव्यस्य सकलशरीरव्यापि जीवितमौचित्यं स्फुटत्वेन स्फुरदवभासते।**

**व्याख्या-** साम्प्रतं समस्तकाव्यशरीरस्य प्राणस्वरूपभूतस्यौचित्यस्य प्राधान्येन (न तु निश्शेषेन, एतेन निर्दिष्टस्थलानि अतिरिच्य स्थालान्तरेष्वपि औचित्यमुपलभ्येत इति सूचितम्।) उपलभ्यां प्राप्तव्यां विद्यमानतां दर्शयितुमाह इत्यवतारिकाभागः। अर्थात् इयता ग्रन्थभागेन यल्लक्षणप्रमाणभ्यां प्राधान्यतो निरूपितं तदौचित्यं कतिधा कुत्र कुत्र

किम्रूपतामापद्य दृष्टिगोचरं भवतीति यावद्भावः। अर्थात् काव्ये औचित्यस्य क्षेत्राणि तावत् दर्शनीयानीति चेदुच्यते निम्नप्रस्तुतपदादिस्थलेषु औचित्यं प्राधान्येनोपलभ्यत इति तदुत्तरम्।

1.**पदे** सुप्तिङन्तरूपे,2.**वाक्ये** पदसमवाये,3.**प्रबन्धार्थे** प्रबन्धस्य रघुवंशादिरूपस्य अर्थे प्रतिपाद्यविषये, 4.**गुणे** ओजःप्रसादादिरूपे, 5.**अलङ्करणे** अनुप्रासोपमादिरूपे, 6.**रसे** करुणशान्तादिरूपे,7.**क्रियायां** भवति,अत्ति,जुहोतीत्यादिपदगम्यायां,8.**कारके** कर्तृ-कर्मादिरूपे,9.**लिङ्गे** स्त्रीपुमादिरूपे,10.**वचने** एकद्विबहुवचनरूपे,11.**विशेषणे** विशेष्यनिष्ठगुणबोधकपदे,12.**उपसर्गे** क्रियायोगाश्रिते प्रपरादिरूपे,13.**निपाते** अद्रव्यार्थके तु,हि,चादिरूपे, 14.**काले** समये,15.**देशे**स्थानविशेषे,16.**कुले** वंशे,17.**व्रते** नियमविशेषे,18.**तत्त्वे** तत्त्वाभिधानेयाथार्थ्येन सत्योपस्थापने,19.**सत्त्वे** अन्तर्बलाभि-ख्यापने, 20.**अभिप्राये** तात्पर्ये, 21.**स्वभावे** निसर्गे,22.**सारसंग्रहे** निष्कृष्टार्थ-कथने,23.**प्रतिभायां** नवनवोन्मेष- शालिन्यां बुद्धौ,24.**अवस्थायां** वयः क्रमे,25.**विचारे** विवेचनायां, 26.**नाम्नि** नामधेये, 27.**आशिषि** आशीर्वचने च सर्वत्र व्यापितया काव्याङ्गेषु जीवनमौचित्यमेव स्यादिति निश्चित्य प्राहुर्मनीषिण इति भावः।

एवमेतेषु पदादिस्थलेषु शरीरस्य मर्मस्थलेष्विव प्राधान्येन प्राणतत्त्वमौचित्यं स्फुरदवभासते।एतदतिरिक्तस्थलेष्वपि औचित्यस्य सत्ता अनिवार्यैव। यथा शरीरस्य प्रतिकणमपि प्राणसञ्चारे सत्यपि क्वचित् मर्मस्थलेषु यदि कश्चिदाघातो जातश्चेद् झटित्येव प्राणाः शरीरादुत्क्रामन्ते। तथैव काव्यस्य पदादिरूपमर्मस्थलेषु यद्यौचित्यं न परिपोषितं चेत् तत्काव्यं निर्जीवं सत् सकलनिरादरपात्रं भवति। अनेन औचित्यविरहमकाव्यं तद्युक्तं काव्यमिति अन्वयव्यतिरेकाभ्यां काव्यस्य निर्दुष्टस्वरूपं प्रतीयते। 8-10

प्र. औचित्यप्रसङ्गे कति काव्याङ्गानि दत्तानि ? तानि च कानि ?

उ ..................................................................................................

......................................................................................................

......................................................................................................

## 1.7 पदौचित्यम्

**तेषूदाहरणानि क्रमेण दर्शयितुमाह-**

**तिलकं बिभ्रती सूक्तिर्भात्येकमुचितं पदम्।**

**चन्द्राननेव कस्तूरीकृतं श्यामेव चान्दनम्।।**11

**वृत्तिः-** **एकमेवोचितं पदं तिलकायमाणं बिभ्राणा सूक्तिः समुचितपरभाग-शोभातिशयेन रुचिरतामावहति।**

**व्याख्या-** उपर्युक्तौचित्यप्रकारेषु क्रमशः उदाहरणप्रत्युदाहरणपरम्परायां ग्रन्थमेधयितुमीष्टे। काचित्कुलाङ्गना गौरी मृगमदाञ्चितं तिलकं श्यामायमानं दधती, पुनः काचित् श्यामवर्णा वधूः धवलचन्दनचारु तिलकम् आवहन्ती, स्वस्वकान्त्यनुरूपं तिलकं धृत्वा यथा नितरामपि चारुतामापद्यते। तथैव सत्कविभणितिः तिलकमिव प्रधानं सौन्दर्योत्कर्षवत् किञ्चिदेकं पदमुपालम्ब्य महतीं विच्छित्तिमातनोति।11

एवमेव समुचितं पदं तिलकमिव प्रधानं दधाना कविवाणी समुचितशोभातिशयेन चारुतां प्रतिपद्यत इति भावः।

**यथा परिमलस्य-**

**मग्नानि द्विषतां कुलानि समरे त्वत्खड्गधाराकुले,**

**नाथास्मिन्निति वन्दिवाचि बहुशो देव श्रुतायां पुरा।**

**मुग्धा गुर्जरभूमिपालमहिषी प्रत्याशया पाथसः**

**कान्तारे चकिता विमुञ्चति मुहुः पत्युः कृपाणे दृशौ।।**

**व्याख्या-** पदगतमौचित्यमुदाहर्तुं परिमलमहाकवेः श्लोकमुद्धरति। अत्र गूर्जरराजविजेतारं राजानं स्तुवन् कविः कश्चित् श्लोकमिमं वक्ति। श्लोकस्यायं भावो यथा-

हे नाथ!तव खङ्गजलधारासमञ्चितेऽस्मिन् रणाङ्गणे शत्रूणां वंशावलिः बहुशोऽपि नष्टेति वन्दिजनवचनं पूर्वश्रुतमनुस्मरन्ती काचिदविदग्धा मुग्धा महाराज्ञी अरण्ये विस्मिता सती महाराजस्य खङ्गे दृष्टिपातमकार्षीदिति भावः।

अतीवलोकव्यवहारमजानती महाराज्ञीयं खङ्गधारायाः शत्रुवंशालीनिमज्जने सामर्थ्यमस्ति, न तु पिपासाशामनं विधातुम् अस्य सामर्थ्यमिति विषये मुग्धा अनभिज्ञेति तात्पर्यम्।

**वृत्तिः- अत्र मुग्धापदेनौचित्यचमत्कारिणा सूक्तिः शरदिन्दुवदनेव श्यामतिलकेन श्यामेव शुभ्रविशेषकेण विभूषिता सकलकविकुलललामभूतां विच्छित्तिमातनोति।**

**व्याख्या-** अत्र समुचितार्थप्रतीतिदृष्ट्या सुरुचिरचमत्कारकारिणा मुग्धा इति पदप्रयोगेन कविभणितिरियं श्यामतिलकविभूषिता चन्द्रवदनेव, धवलचन्दनचर्चिता श्यामेव विभूषिता समस्तकविकुलस्पृहनीयां विच्छित्तिमादधाति। गूर्जरमहीपालस्य पत्न्याः यथार्थतया विद्यमानां अनभिज्ञताम् अभिव्यञ्जितुमिदं पदं निपुणमिति हेतोरेव सकलसहृदयहृदयाकर्षिचमत्कारविशेषमातनीतुमर्हमिदम्।

| |
|---|
| प्र. अस्मिन् श्लोके 'मुग्धा' इति पदेन कथमौचित्यं जायते ? |
| उ ........................................................................................ |
| ........................................................................................ |

## 1.8 पदगतमनौचित्यम्

**न तु यथा धर्मकीर्तेः-**

**लावण्यद्रविणव्ययो न गणितः क्लेशो महान्स्वीकृतः,**

**स्वच्छन्दस्य सुखं जनस्य वसतश्चिन्ताज्वरो निर्मितः।**

**एषापि स्वयमेव तुल्यरमणाभावाद्वराकी हता,**

**कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता।।**

**व्याख्या**-पूर्वं पदगतमौचित्यं निरूप्य साम्प्रतं तद्गतमनौचित्यमपि दर्शयितुं प्रकरणमारभते। कस्याश्चित् सुन्दर्याः सौन्दर्यप्रशंसायां धर्मकीर्तेरयं श्लोकः।

ब्रह्मणा अस्याः अपूर्वलावण्यवत्याः कृशाङ्ग्याः शरीरलतिकां रचयता मनसि को वा अभिप्रायः निश्चित इति नाहं जाने।यतोऽस्याः शरीरसौन्दर्यनिर्माणे सौन्दर्यसम्पत्तिव्ययः सुमहान् आसीत्। तथापि स न गणितः। तदुपरि महतावधानेन एतन्निर्माणे अतीव सूक्ष्मेक्षिकया भूयान् परिश्रमोऽपि अङ्गीकृतः।इत्थमस्य सौन्दर्यस्य निर्माणेन ब्रह्मणा स्वकीया हानिस्तु कृतैव। किन्तु पूर्वमत्यन्तं स्वैरं सुखमयं जीवनं यापयतः पुरुषस्य मनसि चिन्तासन्तापोऽपि गरीयान् उत्पादितः। पुनरियमपि अभागधेया वराकी स्वानुरूपं सन्दरं वरमलभमाना हताशैव।यदि विधातुः अस्याः अनुरूपसुन्दरवरनिर्माणे सामर्थ्यं नासीच्चेत्, तर्हि किमर्थमस्यै ईदृगलौकिकसौन्दर्यसम्पत्तिप्रदानम्? अनेन विधातुः परिश्रमो निरर्थकः, अस्याः जननं निरर्थकम्, अन्यस्य कस्यापि एतदप्राप्त्याआशापि निरर्थिकेति सर्वं जातमनर्थकम्।

**वृत्तिः- अत्र 'तन्व्याः' इति पदं केवलशब्दानुप्रासव्यसनितया निबद्धं न काञ्चिदर्थौचित्यचमत्कारकणिकामाविष्करोति। 'सुन्दर्याः' इत्यत्र पदमनुरूपं स्यात्।**

**अन्यानि वा निरतिशयरूपलावण्यव्यञ्जकानि। तन्वीपदं तु विरहविधुररमणीजने प्रयुक्तमर्थौचित्यशोभां जनयति।**

**व्याख्या-** पूर्वाभिहितमर्थमुपपादयति। उपर्युक्तपद्ये 'तन्व्या' इति पदं 'तनुं तन्वता' इत्याकारकतकारानुप्रासव्यसनेनैव प्रयुक्तमिति भाव्यम्। एवमनेन प्रयोगेन वाच्यौचित्य-चमत्कारकणिकापि न जायते। अत्र 'तन्व्या' इति पदस्थाने 'सुन्दर्याः' इति पदस्य वा उत अनुरूपालौकिकसौन्दर्याभिव्यञ्जकपदानां वा प्रयोगः युक्तस्स्यादिति शेषः। सुन्दर्यादि-पदप्रयोगेन यदि छन्दोभङ्गभीतिः स्यात् चेत् 'कान्तामिमां तन्वता' इत्येवं रचनायां न काचिदार्थिकी छान्दसी वा हानिः। तन्वीपदन्तु वियोगक्षामवनिताप्रपञ्चे प्रयुक्तं चेत् अर्थौचित्यशोभां सम्पादयति। इह तु किञ्चिद्विलक्षणप्रसङ्गान्तरात् तन्वीपदप्रयोगः सहृदय-हृदयोद्वेजकः इति मन्तव्यः।

प्र. अस्मिन् श्लोके पदगतस्य अनौचित्यस्य कारणं किम् ?

उ ..........................................................................................

..........................................................................................

●●●

## औचित्यविचारचर्चा – प्रथमाध्यायप्रश्नाः

01. ग्रन्थस्य आदौ क्षेमेन्द्रेण कृतं मङ्गलाचरणश्लोकं व्याख्यात ?

02. काव्ये औचित्यस्य प्राधान्यम् उपपादयत ?

03. औचित्यस्य लक्षणं यथाग्रन्थं विवृणुत ?

04. काव्यस्य केषु अङ्गेषु औचित्यं प्राधान्येन स्यादिति यथाग्रन्थं व्याख्यात ?

05. पदगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

•••

# औचित्यविचारचर्चा – द्वितीयोऽध्यायः

## संरचना

2.1 प्रस्तावना

2.2 उद्दिष्टाधिगमविशेषाः

2.3 वाक्यौचित्यम्

वाक्यगतमनौचित्यम्

2.4 प्रबन्धार्थौचित्यम्

2.5 प्रबन्धार्थगतमनौचित्यम्

2.6 गुणौचित्यम्

2.7 गुणगतमनौचित्यम्

2.8 अलङ्कारौचित्यम्

2.9 अलङ्कारगतमनौचित्यम्

## 2.1 प्रस्तावना

औचित्यस्य भृशमुपपत्तिपुरस्सरं समग्रं स्वरूपं विनिर्धार्य, पदगतत्वेन स्थितस्य औचित्यस्य अनौचित्यस्य च हेतुं सविमर्शमालोच्य साम्प्रतमस्मिन् अध्याये वाक्यगतत्वेन, प्रबन्धार्थगतत्वेन, गुणगतत्वेन, अलङ्कारगतत्वेन च विद्यमानं औचित्यमनौचित्यञ्च सहेतुकं प्रतिपादयितुं प्रकरणमारभ्यते।

## 2.2 उद्दिष्टाधिगमविशेषाः

- वाक्यगतमौचित्यमनौचित्यञ्च सोदाहरणं सोपपत्तिकमभिज्ञायते।
- प्रबन्धार्थगतमौचित्यमनौचित्यञ्च सोदाहरणं सोपपत्तिकमभिज्ञायते।
- गुणगतमौचित्यमनौचित्यञ्च सोदाहरणं सोपपत्तिकमभिज्ञायते।

- अलङ्कारगतमौचित्यमनौचित्यञ्च सोदाहरणं सोपपत्तिकमभिज्ञायते।

## 2.3 वाक्यौचित्यम्

**वाक्यगतौचित्यं दर्शयितुमाह-**

**औचित्यरचितं वाक्यं सततं सम्मतं सताम्।**
**त्यागोदग्रमिवैश्वर्यं शीलोज्ज्वलमिव श्रुतम्।।12**

**वृत्तिः- औचित्यरचितं वाक्यं काव्यविवेकविचक्षणानामभिमततमम्।**

**व्याख्या-**पदगतमौचित्यमनौचित्यञ्चोपपाद्यवाक्यगतमौचित्यं निरूपयितुमाह।औचित्यप्राधान्यधिया सहजसुन्दरं यत्किञ्चिदेकं वाक्यं प्रणीतञ्चेत् तत् त्यागादिसद्गुण- सहस्रेण उदात्ततामितमैश्वर्यमिव, सौजन्यादिसात्विकभावसम्पत्या कीर्तिकाष्ठामितं सत्य- विद्यासंस्कारादिकमिव काव्यर्थविवेकचतुराणां विदुषां सचेतसां सर्वदा नितरामभीप्सिततमं स्यादिति निश्चयः।12

औचित्यप्राधान्यदृष्ट्या विरचितं पदसमुदायकं वाक्यं काव्यतत्त्वविदुषां नितरामादर-भाजनं स्यादिति भावः।

**यथा मम विनयवल्ल्याम्-**

**देवो दयावान्विजयी जितात्मायमौ मनःसंयममाननीयौ।**
**इति ब्रुवाणः स्वभुजं प्रमार्ष्टियः कीचकाकालिककालदण्डम्।।**
**धीरः स किर्मीरजटासुरारिःकुबेरशौर्यप्रशमोपदेष्टा।**
**दृष्टो हिडिम्बादयितः कुरूणांपर्यन्तरेखागणनाकृतान्तः।।(युग्मकम्)**

**व्याख्या-** वाक्यगतमौचित्यमुदाहर्तुं स्वरचितविनयवल्लीनामकग्रन्थात् श्लोकयुगल-मिदं प्रस्तौति।महाराजो युधिष्ठिरः भूतदयादिगुणोत्तमानुपादाय सदा दयालुर्जातः। महासाहसोपेतः जिष्णुरर्जुनः जितात्मव्यापारः संवृत्तः।युगलौ कनिष्ठौ नकुलसहदेवौ

मनोवृत्तिनिरोधे प्रागेव मतौ प्रथितौ च। अत ईदृशविपत्करसंकुलावस्थायां एभिश्चतुर्भिरपि न किञ्चिदपि व्यवस्यत इति निश्चित्य, पूर्वोक्तदृशा अभिदधानः यः (भीमसेनः) विराटश्यालकस्य कीचकस्य मृत्युकाले असामयिकयमदण्डमिव वर्तमानं निजभुजदण्डद्वयं प्रमार्जयति, किर्मीरजटासुरवैरी, धनाधिपशौर्यविनाशहेतुः कुरुवंशस्य जीवनान्तकः सः हिडिम्बावल्लभः, महान् धैर्यशाली भीमसेनः लोकैरवलोकितः।

**वृत्तिः- अत्र भीमस्य भीमचरितोचितकीचकाकालिककालदण्डहिडिम्बादयितादिभिः पदैरुन्निद्रस्वरूपानुरूपो वाक्यार्थः सजीव इव भासते।**

**व्याख्या-** अत्र पद्यद्वये भीमसेनस्य भीमचरित्रानुरूपतत्तद्विशेषणोपादानेन कीचकाकालिककालदण्डं स्वभुजं प्रमार्ष्टि, धीरः, किर्मीरजटासुरारिः, कुबेरशौर्यप्रशमोपदेष्टा, कुरूणां पर्यन्तरेखागणनाकृतान्तः, हिडिम्बादयित इत्याकारकैः पदैः प्रमीलितरौद्ररसोचितो वाक्यार्थः सचेतन इवावभासते। अत्र नैकपदोदितवाक्यगतत्वेनौचित्यस्य सत्ता निर्बाधा वर्तते।

प्र. अत्र भीमसेनस्य स्वभावानुरूपैः विशेषणपदैः वाक्यौचित्यं कथमुत्पन्नम् ?

उ ...........................................................................................

...........................................................................................

## 2.4 वाक्यगतमनौचित्यम्

**न तु यथा राजशेखरस्य -**

**नाले शौर्यमहोत्पलस्य विपुले सेतौ समिद्वारिधेः**
**शश्वत्खड्गभुजङ्गचन्दनतरौ क्रीडोपधाने श्रियः।**
**आलाने जयकुञ्जरस्य सुदृशां कन्दर्पदर्पे परं**
**श्रीदुर्योधनदोष्णि विक्रमपरे लीनं जगन्नन्दतु।।**

**व्याख्या-** पूर्वप्रस्तुतश्लोकेन वाक्यगतमौचित्यमुदाहृत्य साम्प्रतं राजशेखरस्य श्लोकमेकं वाक्यगतानौचित्याय उदाहर्तुमादत्ते।

पराक्रमात्मककमलिनीनालदण्डरूपे,रणार्णवसेतुबन्धरूपे,करवालव्यालचन्दनपादपात्मके,लक्ष्मीविनोदक्रीडोपधानरूपे,विजयमातङ्गश्रृङ्खलाबन्धरूपे,सुनयनाकुसुमचापाखर्वगर्वरूपे, पराक्रमशालिनि, महाराजदुर्योधनस्य बाहुदण्डे निवसत् जगदिदं प्रसीदतु। अर्थात् नैकगुणविशेषविशिष्टश्रीदुर्योधनभुजच्छायामाश्रितो संसारोऽयं समग्रो विश्रान्तः परमानन्दमापद्यतामिति भावः। एतेनास्य भुजदण्ड एव राजदण्डधारणदक्ष इत्यपि व्यञ्जितम्।

**वृत्तिः- अत्रातिशयपरकर्कशसोत्कर्षसुभटभुजस्तम्भस्यासमुचितेनकुवलयनालतुलाधिरोपणेन वाक्यार्थः सोपहासतयेव निबद्धः परिज्ञायते।।** 12

**व्याख्या-** श्लोकेऽस्मिन् शत्रूणां भयङ्करस्य कठोरस्य तथाअसमानवीरतासम्पादकस्य भटमूर्धन्यस्य दुर्योधनभुजस्तम्भस्य कोमलकमलनालसाम्यप्रतिपादनेन वाक्यार्थः उपहासायैव निर्मित इति विज्ञायते।पराक्रमोचिततादृशकठिनविशेषणार्हे दुर्योधनभुजदण्डे सुकुमारकमलनालतुलना नितरामसह्येति, अभीष्टवीररसाभिव्यक्तौ व्याघातकारिणीति,एतदर्थप्रतिपादकवाक्यमिदम् उपहासं निश्चित्यैव रचितमिति भावः। 12

| |
|---|
| प्र. अस्मिन् श्लोके वाक्यगतत्वेन अनौचित्यस्य कारणं किम् ? |
| उ ........................................................................................................ |
| ........................................................................................................... |

## 2.5 प्रबन्धार्थौचित्यम्

**प्रबन्धार्थौचित्यं दर्शयितुमाह-**

**उचितार्थविशेषेण प्रबन्धार्थः प्रकाशते।**

**गुणप्रभावभव्येन विभवेनेव सज्जनः।।** 13

**वृत्तिः- अम्लानप्रतिभाप्रकर्षोत्प्रेक्षितेन सकलप्रबन्धार्थाप्यायिपीयूषवर्षेण समुचिता-र्थविशेषेण महाकाव्यं चमत्कारकारितामापद्यते।**

**व्याख्या-** पूर्वक्रमानुगतं तृतीयं प्रबन्धार्थौचित्यं निरूपयितुं प्रकरणमारभते। दाक्षिण्यादिगुणमहिम्ना परिपूतेनैश्वर्येण महाजनः यथा तेजस्वी जायते, तथैव समुचितार्थ-वैशिष्ट्येन महावाक्यात्मककाव्यप्रतिपाद्यविषयोऽपि नितरामोजस्वितामापद्यते। 13

कारिकार्थं विवृणोति। विलक्षणप्रतिभाधिक्यसमुद्भावितेन समस्तकाव्यार्थपरिप्लावकेन सरसतासम्पादकेन अमृतवर्षात्मना औचित्यानुप्राणितार्थविशेषेण सर्गबन्धात्मकः काव्यविशेषः स्फुरद्भासमान इव अलौकिकानन्दजनकतामापद्यते।

**यथा कालिदासस्य-**

**जातं वंशे भुवनविदिते पुष्कलावर्तकानां,**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं,**
**याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा।।**

**व्याख्या-** प्रबन्धार्थगतमौचित्यमुदाहर्तुं कविकुलगुरोः महाकविकालिदासस्य मेघदूतकाव्यात् श्लोकमिमं प्रस्तौति।

हे जलधर! पुष्कलावर्तकनाम्ना विश्वप्रशस्ये सुप्रसिद्धे च वंशे जातम्, इच्छाधीनविग्रहम्, इन्द्रस्य प्रधानामात्यं त्वामहं मनसा आत्मना च परिचिनोमि।आभिजात्यात्तव परदुःखासहिष्णुत्वादिभावैः परोपकारितादिगुणाः सहजा एव। अतः पत्नीवियोगजन्यदुःखसन्तप्तोऽहमनिर्दिष्टनामा यक्षः दुर्दैवयोगात्तवाग्रे याचकतामापन्नः। अर्थात् त्वामहं दैन्येन याच इत्यर्थः। गुणोत्कृष्टे महाजने याचना विफलापि श्रेयस्येव। परन्तु नीचजने सफलापि सा न वरीयसीति भावः। अनेन त्वामहं गुणश्रेष्ठं याचित्वापि विफलः स्याम् तन्मे वरमेव। त्वदपकृष्टं नीचजनम् अर्थित्वा यद्यहं

सफलः स्याम्  तन्मेऽमङ्गलाय। अतस्त्वामेव सर्वात्मना सहायमिति मत्वा प्रतिपन्न इत्यर्थः।

**वृत्तिः- अत्राचेतनस्य चेतनाध्यारोपेण मेघस्य दौत्ययोग्यताधानाय प्रथित-पुष्कलावर्तकपर्जन्यवंश्यत्वममात्यप्रकृतिपुरुषत्वञ्च यदुपन्यस्तं तेन समस्तप्रबन्धस्यो-त्प्रेक्षितेतिवृत्तरुचिरतरस्य निरतिशयमौचित्यमुद्योतितम्।**

**व्याख्या-** अत्र कश्चिदेवं संशयो जागर्ति, यदचेतनो मेघः कथमिव सचेतनस्स्यात्? पुनः परोपकारितादिसाधुगुणाः तस्य कथमिव सम्भवन्ति? इत्येतन्निवारणार्थं स्वयं यक्षः इत्थमभिधत्ते।पुष्कलावर्तकनामकप्रसिद्धमेघवंशोत्पन्नत्वात्, देवराजस्येन्द्रस्य प्रधानपुरुष-त्वाच्च मेघे कुलीनत्वं परदुःखासहिष्णुत्वमित्यादिचेतनधर्माः सङ्घटिताः। तेन अचेतने मेघे चेतनत्वाध्यारोपः जातः। तं चेतनं मत्वैव यक्षः स्वयं याचते यन्मदर्थं किञ्चित्साहाय्य-माचरेति। एतादृशकल्पितेतिवृत्तेन समस्तोऽपि प्रबन्धः अनिर्वचनीयौचित्यसम्पत्तिना परिपूर्णः सचेतश्चेतसि मुदमतितमामाधत्ते।

प्र. मेघे चेतनत्वाध्यारोपः केन हेतुना कृतः?

उ ..........................................................................................

..............................................................................................

## 2.6 प्रबन्धार्थगतमनौचित्यम्

**न तु यथा राजशेखरस्य-**

**रावणः-** **यत्पार्वतीहठकचग्रहणप्रवीणे**
**पाणौ स्थितं पुरभिदःशरदां सहस्रम्।**
**गीर्वाणसारकणनिर्मितगात्रमत्र**
**तन्मैथिलीक्रयधनं धनुराविरस्तु।।**

**जनकः-　　　आविरस्तु सममगर्भसम्भवया सीतया।**

**व्याख्या-** प्रबन्धगतमौचित्यं दर्शयितुं राजशेखरकवेः श्लोकमेनमुपस्थापयति। जनकनन्दिन्याः सीतायाः स्वयंवरमहोत्सवे लङ्केश्वरो रावणो ब्रवीति।

पार्वत्याः केशपाशेन हठधिया क्रीडति हस्ते भगवतः शङ्करस्य वर्षसहस्त्रं वसतिं कृतं यद्धनुः, देवानां तोजोराशिना निर्मितकलेवरं यद्धनुः, तदस्मिन् स्वयंवरोत्सवे जानकीस्वायत्तीकरणमूलद्रविणरूपंमदग्रे प्रकटीभवतु।

इत्येतद्रावणवचो निशम्य स्वयंवरकल्पयिता तत्र भवान् महाराजो जनकः रावणमभिधत्ते। स्वयम्भवया अननुभूतगर्भशोकया सीतया साकमिदं धनुरुपतिष्ठताम्।

**वृत्तिः-अत्र 'आविरस्तु समं सीतया' इति जनकराजेन यदुच्यते तेनास्य पिशिताशनाय तनयाप्रतिपादनमभिमतमिवोपलक्ष्यते। न चैतद्विघ्नः कथं भक्ष्यभूता कुसुमकोमलाङ्गी पुरुषादाय प्रतिपाद्यते, इत्यनौचित्येन प्रसिद्धं वृत्तवैपरीत्यं परं हृदयविसंवादमादधाति।**

**व्याख्या-** श्लोकार्थं सिद्धार्थेन सङ्गमयति। अत्र 'सीतादेव्या सह तद्धनुरपि आविरस्तु' इत्येतज्जनकवचनं नितरामयुक्तं प्रतिभाति। अनेन कदाचिन्मांसभक्षिणे रावणाय सीताप्रदानं जनकस्याभीष्टमितिवत्प्रतीयते।परन्तु कथमपि कुसुमसुकुमारगात्री जनकनन्दिनी महाघोर-राक्षसाय लङ्केश्वराय रावणाय न देया इत्येव भावः। पुनरयं प्रसिद्धरामायणेतिहासविरोधी वृत्तान्तः अनौचित्यात्मा सकलप्रबन्धार्थं दूषयन् निष्प्राणमिव विधत्ते।

| |
|---|
| प्र. अत्र जनकवचनं प्रबन्धार्थप्रसङ्गे कथमनुचितमस्ति ?<br>उ ........................................................................................................<br>.......................................................................................................... |

## 2.7 गुणौचित्यम्

**गुणौचित्यं दर्शयितुमाह-**

**प्रस्तुतार्थोचितः काव्ये भव्यः सौभाग्यवान्गुणः।**
**स्यन्दतीन्दुरिवानन्दं संभोगावसरोदितः।।14**

**वृत्तिः- प्रस्तुतार्थस्यौचित्येनौजःप्रसादमाधुर्यसौकुमार्यादिलक्षणो गुणः काव्ये भव्यः सौभाग्यवत्तामवाप्तः सहृदयानन्दसन्दोहमिन्दुरिव स्यन्दति।**

**व्याख्या-** इतःपूर्वं प्रबन्धार्थगतमौचित्यमनौचित्यञ्च निरूप्य साम्प्रतं क्रमप्राप्तं चतुर्थं गुणौचित्यं निरूपयितुं प्रकरणमारभते।

वर्णनीयार्थोचितः ओजःप्रसादादिरूपो गुणः प्रबन्धे आवर्जकः सौष्ठवोपेतः सन् रतिविलाससमयोदितचन्द्र इव अतितमाम् आनन्दं प्रवाहयतीत्यर्थः। 14

कारिकार्थं विवृणोति। वर्ण्यमानार्थस्य समुचितविन्यासेन ओजःप्रसाद-माधुर्यसौकुमार्यादिवामनाभिमतो गुणग्रामः (दशसंख्याक इति यावत्) सर्गबन्धे कल्याणात्मकः निर्वर्ण्यसौष्ठवोपेतः सहृदयहृदयामोदपरम्परामिन्दुश्चन्द्र इव स्रावयतीत्यर्थः।

**यथा भट्टनारायणस्य-**

**महाप्रलयमारुतक्षुभितपुष्कलावर्तक-**
**प्रचण्डघनगर्जितप्रतिरवानुकारी मुहुः।**
**रवः श्रवणभैरवः स्थगितरोदसीकन्दरः**
**कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः।।**

**व्याख्या-** गुणगतमौचित्यमुदाहर्तुं भट्टनारायणस्य वेणीसंहारनाटकात् श्लोकमिमं प्रस्तौति।

**प्रसङ्गपूर्वरङ्गम्-** राजगुरोः द्रोणाचार्यस्य संहारात्परं विनाथा कौरववाहिनी चतुर्दिशमितस्ततः पलायनपरायणा संवृत्ता। तादृशविकटसमये शस्त्रास्त्राणां परस्पर-संघर्षनोत्थं ध्वनिमाकर्णयन् सुभटकुलकुञ्जरः द्रोणपुत्रः अश्वत्थामा रणाजिरमाविशत्। तदुक्तं वचनमिदं-

कल्पान्तकालीनप्रभञ्जनमहावातेन प्रकम्पितयोः पुष्कलावर्तकयोः महामेघयोः गर्जितप्रतिध्वनिमनुकुर्वन्, कर्णकठोरः, भूम्याकाशयोरन्तरालगुहां परिव्याप्तः, अश्रुतपूर्वः, मत्पुरतः साम्प्रतं रणार्णवात् पुनः पुनः शस्त्रास्त्रयोः अयं भीषणध्वानः कुतस्समुज्जृम्भते ?

**वृत्तिः- अत्रोजस्विनो भटमुकुटमनेरश्वत्थाम्नः स्फूर्जदूर्जितप्रतापानुरूपं वाक्यमोजसा काव्यगुणेनोदग्रतामवाप्तं सहस्रगुणमिव विक्रमौचित्यगौरवमावहति।**

**व्याख्या-** अत्र गुणौचित्यं समीक्षते। महाप्रतापशालिनः सुभटकुलकुञ्जरस्य द्रोणतनुजस्य अश्वत्थाम्नः समुज्ज्वलोच्छ्वसितपराक्रमसदृशं यद्वाक्यं व्याहृतं तदोजोनामक-काव्यगुणसंवलितं सत् समुन्नतिमवाप्य सहस्राधिकगुणं पराक्रमौचित्यगौरवं बिभर्ति।

प्र. अत्र अश्वत्थाम्नः वचनेषु कः गुणः वर्तते ?

उ ........................................................................................................

........................................................................................................

## 2.8 गुणगतमनौचित्यम्

**न तु यथा चन्द्रकस्य-**

**युद्धेषु भाग्यचपलेषु न मे प्रतिज्ञा**

**दैवं नियच्छति जयञ्च पराजयञ्च।**

**एषैव मे रणगतस्य सदा प्रतिज्ञा**

**पश्यन्ति यन्न रिपवो जघनं हयानाम्।।**

**व्याख्या-** गुणगतमौचित्यं दर्शयितुं चन्द्रककवेः श्लोकमुदाहरति।

अत्र युद्धावस्था अतीवविचित्रा। एतद्विषये जयो वा पराजयो वा मे स्यादिति आदावेव निश्चित्य वक्तुं न पारयामि। तत्र जयपराजयौ केवलं भाग्यायत्तौ। परन्तु मत्पक्षतो वक्तुमिदं शक्नोमि यत् शत्रुपराक्रमं असहमानाः मम तुरङ्गाः कदापि तेषां जघनदेशं शत्रून् न दर्शयिष्यन्ति।अर्थात् शत्रवः पलायनपरं मां वा, मदश्वान् वा न पश्यन्तीति भावः।कीदृशविकटावस्थायामपि अहन्तु शौर्येण आमरणं योत्स्यामीति निर्गलितार्थः।

**वृत्तिः- अत्र क्षात्रवृत्तिरिवौजसा काव्यगुणेनास्पृष्टा सुभटोक्तिरुचितार्थापि तेजो-जीवितविरहिता दुर्गतगृहदीपशिखेव मन्दायमाना न विद्योतते।**

**व्याख्या-** अत्र क्षत्रियवीरस्य वचनं तत्प्रवृत्यनुरूपमेव वर्तते। परन्तु तदुक्तेः प्रतिपादनशैली निष्प्राणेव भासते। वस्तुतः कस्यचिद्वीरस्य वचनोपक्रमः तदीयक्षात्रप्रवृत्ते-रनुरूपः पौरुषोपेतः स्यात्। वीरोऽयं तदीयप्रवृत्त्यनुरूपमेव भाषते। किन्तु तस्य मनसि विषाददैन्यादिभावाः पदङ्कुर्वन्तीतिवत्प्रतीयते। अनेन तदीयवचसि ओजस्विता वा पौरुषकला वा न स्फुरति। एतदोजोरूपकाव्यगुणविहीनोऽयं श्लोकः धनहीनजनगृहगत-दीपशिखेव (इन्धनासमृध्या, मन्दप्रकाशा) नितरां अनौचित्येन सहृदयानुद्वेजयति।

| |
|---|
| प्र. अत्र गुणगतस्य अनौचित्यस्य हेतुः कः ? |
| उ ........................................................................................................ |
| ........................................................................................................... |

## 2.9 अलङ्कारौचित्यम्

**अलङ्कारौचित्यं दर्शयितुमाह-**

**अर्थौचित्यवता सूक्तिरलङ्कारेण शोभते।**
**पीनस्तनस्थितेनेव हारेण हरिणेक्षणा।।15**

**वृत्तिः- प्रस्तुतार्थस्यौचित्येनोपमोत्प्रेक्षादिनालङ्कारेण सूक्तिश्चकास्ति। कामिनी-वोच्चकुचचुम्बिना रुचिरमुक्ताकलापेन।**

**व्याख्या-** गुणगतमौचित्यमनौचित्यञ्चयथाविधि सम्यगुपपाद्य साम्प्रतंक्रमप्राप्तमलङ्कारौचित्यं निरूपयितुंप्रकरणमारभते।समुत्तुङ्गपयोधरमध्यवर्तिसमुज्ज्वलहार-रोचिषा तेजश्शालिनी नारी वा, अर्थदृष्ट्या औचित्यसंवलितेनालङ्कारेण कविवाणी प्रतरां विद्योतते।

अर्थदृष्ट्या प्रसिद्धौचित्यवता उपमोत्प्रेक्षाद्यलङ्कारेण कविवाणी उत्तुङ्गपयोधरमध्यगत-हारविराजिता नारीव नितरामुद्योतते।

**यथा श्रीहर्षस्य-**

**विश्रान्तविग्रहकथो रतिमान् जनस्य**
**चित्ते वसन् प्रियवसन्तक एव साक्षात्।**
**पर्युत्सुको निजमहोत्सवदर्शनाय**
**वत्सेश्वरः कुसुमचाप इवाभ्युपैति।।**

**व्याख्या-** अलङ्कारगतमौचित्यं विवेक्तुं महाकवेः श्रीहर्षदेवस्य रत्नावलीनामक-नाटिकातः श्लोकमिममुदाहरति।

**प्रसङ्गपूर्वरङ्गम्-** महाराज उदयनः युद्धक्षेत्रे शत्रून् पराजित्य, तस्मात् कर्मणो विमुक्तः सन् वसन्तमहोत्सवदिदृक्षया तत्पदं स्वयमावर्तते।

युद्धतन्त्रादिकमुपरम्य सकलप्रजानां प्रीतिकरः, अतस्तेषां चेतसि सदा वसतिं कुर्वन्, वसन्तस्य प्रियवयस्यः मदनोत्सववेलां दिदृक्षुः साक्षात् पञ्चबाण इव तत्पदमावर्तते।

**वृत्तिः- अत्र वत्सेश्वरस्य कुसुमचापेनोपमा शृङ्गारावसरसरसचारुतरतामौचित्येन कामपि चेतश्चमत्कारिणीमाविष्करोति।**

**व्याख्या-** श्लोकेऽस्मिन् वसन्तोत्सवसन्दर्भे वत्सेश्वरस्य उदयनमहाराजस्य कामदेवेन सर तुलना शृङ्गाररसानुरूपसौन्दर्यच्छविमादधती सहृदयचेतसि कामपि चमत्कारच्छायां नियच्छति। अत इदमुपमालङ्कारौचित्यस्य सुन्दरमुदाहरणम्।

| |
|---|
| प्र. प्रस्तुतश्लोके उपमालङ्कारेण कीदृशमौचित्यमुद्भूतम्? |
| उ ...................................................................................................... |
| ........................................................................................................... |

## 2.10अलङ्कारगतमनौचित्यम्

**न तु यथा चन्द्रकस्य-**

**खगोक्षिप्तैरन्त्रैस्तरुशिरसि दोलेव रचिता,**
**शिवा तृप्ताहारा स्वपिति रतिखिन्नेव वनिता।**
**तृषार्तो गोमायुः सरुधिरमसिं लेढि बहुशो,**
**बिलान्वेषी सर्पो हतगजकराग्रं प्रविशति।।**

**व्याख्या-** अलङ्कारगतमनौचित्यं दर्शयितुं चन्द्रककवेः श्लोकमिममुदाहरति।

**प्रसङ्गपूर्वरङ्गम्-** क्वचिदितो मनाक्पूर्वमेव संग्रामः परिसमाप्तः।पक्षद्वयमपि स्वस्वदेशम्प्रति निवृत्तम्। मांसप्रियाः पशवः पक्षिणश्च युद्धभूमेः मांसमयं वातावरणं दृष्ट्वा नितरां तुष्यन्ति। तत्कालीनमिदं श्लोकप्रस्तुतं वर्णनम्।

काकादिभिः मांसभोजिभिः पक्षिभिरूर्ध्वं नीतैः सङ्ग्रामहतानां मानवाश्वादीनां क्षुद्रान्त्रैः वृक्षानां शाखासु दोला निर्मिता वा इतिवदाभाति। अर्थात् वृक्षशाखासु लम्बमानानि सूत्ररूपाणि अन्त्राणि दोलाभ्रान्तिं जनयन्ति।जम्बुकी परिपूर्णभोजना तृप्ता सती सुरतक्रीडापरिक्षान्तवनितेव सुखं शेते। पिपासापीडितो गोमायुः (श्रुगालः) रक्तलिप्तं खड्गं नैकवारं जिह्वया स्वदते। निजवासार्थं रन्ध्रं मार्गयन् पन्नगः मृतगजस्य शुण्डादण्डं प्रविशति। एवमासमन्ताद्रणभूमिः प्रलयकालभयङ्करीव वर्तत इति भावः।

**वृत्तिः- अत्रानुचितस्थानस्थितायाः पुरुषपिशिततृप्तसुप्तायाः शिवायाः सुरतकेलिक्लान्तकान्तया विच्छायैवोपमा परं वैपरीत्यं प्रकाशयति।**

**व्याख्या-** श्लोकेऽस्मिन् सुरतकेलिपरिश्रान्तया वनितया सह मानुषमांसभक्षणप्रिया काचिज्जम्बुकी औपम्यङ्गमिता वर्तते। परन्तु इयमुपमा स्थानस्वभावादिदृष्ट्या नितरां अनौचित्यस्य हेतुर्जायते। लोके रमणीयवस्तूनां रमणीयवस्तुभिरेव तुलना सर्वथा प्रशस्यते।परन्तु अत्र प्रकृत्या भयानकरणाङ्गणगतमांसभक्षिणी जम्बुकी केनापि अनिर्वचनीयेन कमनीयवस्तुना सह औपम्यङ्गता सहृदयेषु वैमुख्यं जनयति। अत इदं उपमालङ्कारगतानौचित्यस्य विषममुदाहरणम्।

प्र. श्लोकेऽस्मिन् अनौचित्यस्य कारणं किम्?

उ ...........................................................................................

...........................................................................................

## औचित्यविचारचर्चा - द्वितीयाध्यायप्रश्नाः

01. वाक्यगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

02. प्रबन्धार्थगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

03. गुणगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

04. अलङ्कारगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

•••

# औचित्यविचारचर्चा – तृतोयोऽध्यायः

## संरचना

3.1 प्रस्तावना

3.2 उद्दिष्टाधिगमविशेषाः

**3.3 रसौचित्यम्**

3.3.1 शृङ्गाररसौचित्यम्

3.3.2 शृङ्गाररसगतमनौचित्यम्

3.3.3 हास्यरसौचित्यम्

3.3.4 हास्यरसगतमनौचित्यम्

3.3.5 करुणरसौचित्यम्

3.3.6 करुणरसगतमनौचित्यम्

3.3.7 रौद्ररसौचित्यम्

3.3.8 रौद्ररसगतमनौचित्यम्

## 3.1 प्रस्तावना

पूर्वमितो वाक्य-प्रबन्धार्थ-गुण-अलङ्कारगतत्वेन स्थितस्य औचित्यतदितरयोः सम्यग्विवेकमुपस्थाप्य साम्प्रतमस्मिन् तृतीयेऽध्याये शृङ्गारहास्यकरुणरौद्ररसेषु विद्यमानाम् औचितीम् अनौचितीं च यथानियति समीक्षितुं प्रकरणमारभ्यते।

## 3.2 उद्दिष्टाधिगमविशेषाः

- शृङ्गाररसगतमौचित्यमनौचित्यञ्च सोदाहरणं सविमर्शमभिज्ञायते।
- हास्यरसगतमौचित्यमनौचित्यञ्च सोदाहरणं सविमर्शमभिज्ञायते।

- करुणरसगतमौचित्यमनौचित्यञ्च सोदाहरणं सविमर्शमभिज्ञायते।
- रौद्ररसगतमौचित्यमनौचित्यञ्च सोदाहरणं सविमर्शमभिज्ञायते।

## 3.3 रसौचित्यम्

**रसौचित्यं दर्शयितुमाह-**

**कुर्वन् सर्वाशये व्याप्तिमौचित्यरुचिरो रसः।**

**मधुमास इवाशोकं करोत्यङ्कुरितं मनः।।16**

**वृत्तिः- औचित्येन भ्राजिष्णुः श्रृङ्गारादिलक्षणो रसः सकलजनहृदयव्यापी वसन्त इवाशोकमङ्कुरितं मनः करोति।**

**व्याख्या-** पूर्वमितोऽलङ्कारगतमौचित्यमनौचित्यञ्च यथाविधि परामृश्य, साम्प्रतं क्रमप्राप्तं षष्ठं रसौचित्यं विवेक्तुं प्रकरणमारभते। सर्वेषां सहृदयानां चेतसि स्वकीयां व्यापकसत्तामादधानः, औचित्यपरिबृम्हितत्वात् निरतिशयनिर्वृतिहेतुः, श्रृङ्गारादिनाम्ना व्यपदिश्यमानो रसपदार्थः वसन्तकालो वञ्जुलतरुं यथा समुत्फुल्लयति, तथैव सचेतसां चेतांसि निर्वण्यचर्वणासुखविशेषे प्लावयति। 16

औचित्येन परिबृम्हितत्वान्नितरामूर्जस्वी तेजश्शाली, श्रृङ्गारकरुणादिपदैः व्यपदिश्यमानो लोकोत्तरो रसपदार्थः, सकलसहृदयहृदयमात्रसंवेद्यत्वात् तत्र व्यापकः सन् यथा वसन्तो वञ्जुलविटपिनं विकचमाधत्ते, तथैव सचेतश्चेतांसि सहजप्रमोदेन समुत्फुल्लयति।

### 3.3.1श्रृङ्गाररसौचित्यम्

**श्रृङ्गारे यथा कालिदासस्य -**

**बालेन्दुवक्राण्यविकासभावाद्**

**बभुः पलाशान्यतिलोहितानि।**

**सद्यो वसन्तेन समागतानां**

**नखक्षतानीव वनस्थलीनाम्।।**

**व्याख्या-** रसगतमौचित्यं निदर्शयितुं महाकविकालिदासस्य कुमारसम्भव-महाकाव्यात् उदाहरणश्लोकमुपस्थापयति। द्वितीयाचन्द्रवन्नितरां कुटिलानि, पूर्णतो विकासमप्राप्तानीति हेतोः प्रतरां रक्तिमानमञ्चितानि च किंशुकानि वसन्तरूपनायकेन तत्कालमेव सम्पन्नसम्पर्कानां प्राकृतिकवनभूमीनां (तन्नामकनायिकानां) कपोल-जघनादिदेशे प्रसक्तानि नखरक्षतानीव चकाशिरे।

**वृत्तिः- अत्र पार्वत्यां परमेश्वरस्याभिलाषश्रृङ्गारे वक्ष्यमाणे प्रथममुद्दीपनविभावभूतस्य वसन्तस्य वर्णनायां कामुकाध्यारोपेण वनस्थलीललनानां कुटिललोहितपलाशकलिकाभिर्नवसंगमयोग्यनखक्षतान्युत्प्रेक्षितानि परमामौचित्यचारुतां प्रतिपादयन्ति।**

**व्याख्या-** इतोऽग्रे गौर्यां महेश्वरस्याभिलाषश्रृङ्गारस्य वर्णनमुद्दिष्टमस्ति। अतस्तत्पूर्वमेव श्रृङ्गारानुरूपस्य उद्दीपनविभावात्मकवसन्तर्तोः वर्णनप्रसङ्गे श्लोकोऽयमुल्लिखितः। अत्र वसन्ते नायकारोपः, वनस्थलीषु नायिकारोपश्च अभेदात्मना विहितः। पुनरेवमेव कुटिलरक्तकिंशुकमुकुलेषु सद्यः सङ्गतनायिकाकपोलादिदेशे नायकविरचितनखक्षतानामुत्प्रेक्षणमपि विहितम्। एतदग्रे वर्ण्यमाणश्रृङ्गारसन्निवेशस्यानुरूप्यात् महतीमौचित्यच्छायां प्रयच्छति। अनेन सहृदयानां मनसि काचिदनिर्वाच्या रुचिरतानुभूतिर्जायते।

| |
|---|
| प्र. श्लोकेऽस्मिन् श्रृङ्गाररसास्वादे रुचिरताबीजं किम् ? |
| उ ........................................................................................................ |
| ........................................................................................................ |

### 3.3.2श्रृङ्गाररसगतमनौचित्यम्

**न तु यथास्यैव-**

**वर्णप्रकर्षे सति कर्णिकारं**

**दुनोति निर्गन्धतया स्म चेतः।**

**प्रायेण सामग्र्यविधौ गुणानां**

**पराङ्मुखी विश्वसृजः प्रवृत्तिः।।**

**व्याख्या-** श्रृङ्गाररसगतमनौचित्यं निरूपयितुं महाकवेः कालिदासस्य कुमारसम्भवमहाकाव्यात् श्लोकमेनमुदाहरति।

वर्णाकृतिदृष्ट्या नितराञ्चारुतरमपि कर्णिकारप्रसूनं सुगन्धराहित्यान्नितरां कलाप्रियस्य चेतः खेदयति। यतः लोके सर्वेषामपि गुणानां सामग्र्यमेकत्र सम्पादयितुं प्रजापतेः कृतिमत्ता प्रायेण विमुखीव दृश्यते।अत एव सुन्दरात्सुदरतरमपि वस्तु यत्किञ्चिद् गुणापकर्षस्य पदं स्यादित्यत्र नास्त्यनुभवविरोधः।

**वृत्तिः- अत्र केवलकर्णिकारकुसुमवर्णनमात्रेण विधातृवाच्यतागर्भेणैव प्रस्तुतश्रृङ्गा-रानुपयोगिना तदुद्दीपनविभावोचितं न किञ्चिदभिहितम्।**

**व्याख्या-** अत्र कर्णिकारकुसुमस्य एवंविधं वर्णनं विहितं वर्तते, तेन काव्ये प्रस्तुतश्रृङ्गाररस्स्य न किञ्चिदप्युद्दीपनं जायते। पुनः विधातुर्निन्दैव प्राधान्येनात्र श्रूयते। अतः श्रृङ्गाररसस्य उद्दीपनविभावादिप्रसङ्गेऽस्मिन् ईदृशं वर्णनंन किञ्चिदप्यौचित्यं पुष्णाति।तथा निष्कारणविधातृनिन्दया मनोऽपि ग्लायति।यतोऽस्यैव कवेरुक्तिरियं यद्-

**एको हि दोषो गुणसन्निपाते**

**निमज्जतीन्दोः किरणेष्विवाङ्कः।**

अर्थात् दोषोऽपि गुणस्य समुत्कर्षसीमासम्प्रापणे नितरामुपकारकः स्यादेव।

| |
|---|
| प्र. सामग्र्यविधौ विश्वसृजः प्रवृत्तिः कीदृशी ? |
| उ ......................................................................................................... |
| ............................................................................................................ |

## 3.3.3हास्यरसौचित्यम्

**हास्यरसे यथा मम लावण्यवत्याम् -**

**मार्गे केतकसूचिभिन्नचरणा सीत्कारिणी केरली**
**रम्यं रम्यमहो पुनः कुरु विटेनेत्यर्थिता सस्मिता।**
**कान्ता दन्तचतुष्कबिम्बितशशिज्योत्स्नापटेन क्षणं**
**धूर्तालोकनलज्जितेव तनुते मन्ये मुखाच्छादनम्।।**

**व्याख्या-**क्षेमेन्द्रः स्वीयलावण्यवतीकाव्यादेव हास्यरसगतमौचित्यं निभालयितुं श्लोकमत्रोदाहरति।

काचित् केरलदेशवासिनी नायिका निजविटेन सहाभिसरन्ती मार्गे प्रवृत्ता। तत्र क्वचिदेकत्र केतककण्टकविदीर्णचरणा वेदनया सीत्कारं कुर्वती वर्तते स्म। तदीयसीत्कारमधुरस्वानमाकर्ण्य विटः वदत्येवम्, अहो मधुरम्! मधुरतरमिदम्! पुनः पुनरप्येवं विधेहीति भूयसा तां तत्कर्मणि प्रवर्तयति स्म। विटस्य प्रार्थनामीदृशीमालभ्य सा दरतो जहास। तदा तदीयमास्यं सुव्यक्तमासीत्। तत्क्षणमेव अधरनिकटोज्ज्वलदन्तचन्द्र-चन्द्रिकया मुखमण्डलं तदीयमावृतम्। एवम्भूतावस्थायां दुष्टविटस्य मुखवीक्षणलज्जया निजाग्रदन्तप्रतिबिम्बितचन्द्रचन्द्रिकावरणेन मुखमाच्छादयतीव सा प्रतीयते स्म।

**वृत्तिः-अत्रापि हास्यरसस्य कुटिलविटनर्मौक्तिवचनौचित्येन शृङ्गाररसाभासाधिवासितस्य सचमत्कारः परः परिपोषः समुन्मिषति।**

**व्याख्या-** अत्राप्युपस्थितपद्ये धूर्तगणशेखरेण विटेण ताम्प्रत्युक्तचाटुवचनानां समुचितविन्यासप्रकारेण शृङ्गाररसाभासानुप्राणितहास्यरसस्य परिपोषः प्रतरां चमत्कारगरिम्ना समुल्लसति।

प्र. हास्यरसगतस्यौचित्यस्य किमत्र कारणमुक्तम् ?

उ ..........................................................................................................

..........................................................................................................

## 3.3.4हास्यरसगतमनौचित्यम्

**न तु यथा श्यामलकस्य-**

**चुम्बनसक्तः सोऽस्या दशनं च्युतमात्मनो वदनात्।**
**जिह्वामूलप्राप्तं खाडिति कृत्वा निरष्ठीवत्।।**

**व्याख्या-** हास्यरसगतमनौचित्यं दर्शयितुं श्यामलकस्य श्लोकमुदाहरति।

कश्चिदधमो नेता कस्याश्चिद् वृद्धायाः मुखचुम्बनप्रीतो बभूव। तस्मिन्नेव समये तस्याः दशनमेकं तृटितम्। तदस्य कण्ठमूलस्थाने पतितम्। तदा खाडिति (निष्ठीवनकालिकमुद्रोच्चारितं खाडिति शब्दविशेषं) कृत्वा स्वस्य मुखात् तद्दशनं निरष्ठीवत्(बहिरुत्सृजदित्यर्थः)।

**वृत्तिः- अत्र हास्यरसस्य बीभत्सरसाधिवासितस्य लशुनलिप्तस्येव कुसुमशेखरस्याविजुगुप्सितत्वादनीप्सितस्य परमानौचित्येन**

**चमत्कारस्तिरोहितः। वृद्धापरिचुम्बनेजिह्वामलप्राप्तस्य च्युतदशनस्य कण्ठलोलिनः ष्ठीवनेन बीभत्सस्यैव प्राधान्यम्, न तु हास्यरसस्य।**

**व्याख्या-** यथा लशुनयुक्तं शिरोधार्यं यत्प्रसूनमाल्यं तत्स्वकीयप्राकृतिकसुगन्धितां विसृज्य नितान्तदुर्गन्धघनिष्ठं सत् जुगुप्सितं तिरस्कृतञ्च स्यात्, तथैवात्र बीभत्सरससंवलितस्य हास्यरसस्यापि चमत्कारो नेषदपि चारुतामातन्वानः तिरस्कृतः संवृत्तः। पुनश्चबीभत्सहास्ययोः परस्परवैधर्म्यात् कदाप्यनयोरङ्गाङ्गिभावेन वर्णनम-साम्प्रतमेव। यत ईदृश्यामवस्थायां हास्यरसो निजचमत्कारकलेवरं सर्वात्मना विनष्टः सन् गौणो जायते। बीभत्सस्तु सम्प्रत्यत्र जरठामुखचुम्बनादिना तत्क्षणगलितदन्तस्य नायककण्ठमूलप्राप्तस्य खाडिति निष्ठीवनादिवर्णनमुखेन सर्वतः प्रधानः सन् नितरामनौचित्यबुद्धिं द्रढयति।

| |
|---|
| प्र. अत्र हास्यरसस्य चमत्कारः केन हेतुना तिरोहितः? |
| उ ........................................................................................................ |
| ............................................................................................................ |

### 3.3.5करुणरसौचित्यम्

**करुणे यथा मम मुनिमतमीमांसायां-**

**प्रत्यग्रोपनताभिमन्युनिधने हा वत्स! हा पुत्रके-**
**त्यश्मद्रावि सुभद्रया विलपितं पार्थस्य यत्तत्पुरः।**
**येनोद्बाष्पविमुक्तशष्पकवलैः सेनातुरङ्गैरपि**
**न्यञ्चत्पार्श्वगतैककर्णकुहरैर्निस्पन्दमन्दं स्थितम्।।**

**व्याख्या-** करुणरसगतमौचित्यं निदर्शयितुं क्षेमेन्द्रः निजप्रणीतमुनिमतमीमांसा-नामककाव्यात् श्लोकमिममुदाहरति।

तस्मिन्नेव काले प्रवृत्तस्य निजपुत्रनिधनस्य दुर्वार्तामाकर्ण्य माता सुभद्रा स्वस्वामिनः अर्जुनस्य सन्निधावेव हा पुत्र! हा वत्स! इत्यादिना शोकभरेण विललाप। स चायं विलापः प्रस्तराणामपि हृदयानि द्रावयितुं क्षम आसीत्। (नितरां हृदयविदारकशोक-समय इत्यर्थः)। तदीयकरुणक्रन्दनं श्रुत्वा ध्वजिनीवाजिनोऽपि अश्रूणि विमुच्य, तृणकवलाण्यपि अनादृत्य, निजकर्णौ नम्रीकृत्य, तद्दिशि एव श्रुतिं व्यापारयन्तः निश्चलाः निश्चेष्टाश्च सन्तः अवतस्थुः।

**वृत्तिः- अत्र प्रत्यग्रोपनतप्रियतरतनयवियोगोपजनितशोकाख्यस्थायिभावोचितं दृषतामपि हृदयद्रावणं सुभद्रया यद्विलपितं तदर्जुनचेतसि प्रतिफलितं न केवल-मुद्दीप्ततामुपगतं यावत्तिरश्चां तुरङ्गमाणामप्यन्तःसंक्रान्तमुद्बाष्पविमुक्तशाष्पकवल-निस्पन्दमन्दस्थितादिभिरनुभावैरुदीर्णतरुणकरुणरसप्रतिपत्तिं किमप्यादधाति।**

**व्याख्या-** अत्र सपदि सम्प्रवृत्तस्य प्रियतमपुत्रनिधनवृत्तान्तस्य श्रवणात् समुत्पन्नशोकरूपस्थायिभावस्यानुरूपं पाषाणहृदयानामपि द्रावकं यत् सुभद्रया विलपितम्, तत्केवलम् अर्जुनस्य चित्ते एव सङ्क्रम्य करुणरसविभावरूपतां न प्राप्तम्, अपि तु पक्षिणां तिर्यग्जन्तूनामपि हृदयानि करुणरसाप्लावितानि चकार। पुनस्तेषामेव वाहिनीवाजिनां अश्रुविमोचनम्, तृणकवलपरित्यागः, निश्चलनिस्तेजोरूपेणावस्थानमित्यादिभिरनुभावै-रुदितनूतनहृदयविदारिकरुणरसप्रत्याय्यकमपि सुसंवृत्तम्। फलितांशस्तु अयं यथा- कवेरेवंविधसहजस्वभावहृदयद्राविवर्णनेन करुणरसः समुदग्रतामुपेत्य सहृदयचेतसि अविस्मरणीयचारुतासम्पत्तिं सन्तनोति।

प्र. अत्र करुणरसस्य औचित्यबीजं प्रकटयत ?

उ ......................................................................................................

......................................................................................................

## 3.3.6करुणरसगतमनौचित्यम्

**न तु यथा परिमलस्य-**

**हा श्रृङ्गारतरङ्गिणीकुलगिरे! हा राजचूडामणे!**
**हा सौजन्यसुधानिधान! हहहा वैदग्ध्यदुग्धोदधे!।**
**हा दवोज्जयिनीभुजङ्ग! युवतिप्रत्यक्षकन्दर्प! हा**
**हा सद्बान्धव! हा कलामृतकर! क्वासि प्रतीक्षस्व नः।।**

**व्याख्या-** करुणरसगतमनौचित्यं विचारयितुं परिमलकवेः श्लोकमत्र सन्नियच्छति।

**प्रसङ्गपूर्वरङ्गम्-**कस्यचिदुज्जयिनीराज्यमहीपालस्य निधनसमये तदीयपरिवारजनाः इत्थं परिदेवयन्ति। तत्प्रासङ्गिकोऽयं श्लोकः।

हा देव!श्रृङ्गारसरिदुद्गमस्थानरूपपर्वतसन्निभः, नरपालकुलतिलकः, सौजन्यरूप-पीयूषधारासारवर्षी, वैदुष्यमहार्णवः, उज्जयिनीप्रजावल्लभः, तरुणीनां साक्षान्मकरध्वजः, सज्जनानाम् आप्तबन्धुः, कलानां विकसने कुमुदबान्धवः एवमित्यादिसमस्तलक्षणैकनिधानः भवान् अस्मान् परित्यज्य कुत्र यातः? सकृदस्मासु भवदीयदृष्टिपातसुधारसं निषिञ्चतु। वयमपि भवन्तमनुसरामः। अस्मान् प्रतीक्षस्व।

**वृत्तिः- अत्र 'हाहेति' हतमहीपतिविरहे तद्गुणामन्त्रणपदैर्वक्तृवक्त्रगत एव शोकः केवलमुपलक्ष्यते, न तु विभावानुभावव्यभिचारिसंयोगेन शोकाख्यस्य स्थायिभावोचितं रसीकरणं किञ्चिन्निष्पन्नम्।**

**व्याख्या-** अत्र उज्जयिनीक्षितिपतेः कस्यचिन्निधनावस्थायां तदीयबन्धूनां हाहेत्यादिशोकाभिव्यञ्जकशब्दाधिक्येन नृपतिगुणकीर्तनेन च केवलमत्र शोकः वक्तृकण्ठदेशसीमित एव परिलक्ष्यते। न चायं मानसो भावुको वा शोकः। पुनरत्र

विभावानुभावव्यभिचारिसंयोगात् शोकरूपस्थायिभावस्य न काचिदनुरूपा रसचर्वणाप्रतीतिः निष्पन्ना। अतस्सहृदयमनसि कथमिव शोकस्थायिनो भावस्यावेशः सञ्जायेत ? अत इदं करुणरसस्य नितरामनौचित्यपूर्णं पदमिति वेत्तव्यम्।

| |
|---|
| प्र. अत्र करुणरसस्य अनौचित्यकारणं किमभिहितम् ? |
| उ ..................................................................................................... |
| ....................................................................................................... |

## 3.3.7रौद्ररसौचित्यम्

**रौद्रे यथा भट्टनारायणस्य-**

**यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां**
**यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।**
**यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः**
**क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम्।।**

**व्याख्या-** रौद्ररसगतमौचित्यं विवेक्तुं भट्टनारायणप्रणीतवेणीसंहारनाटकादिमं श्लोकमुदाहरति।

**प्रसङ्गपूर्वरङ्गम्-** जन्मदातुः पितुर्मरणं सम्भूतमिति श्रुत्वा तत्कारणं पाण्डवानां कुटिलनीतिरेवेति ज्ञात्वा रणाङ्गणे द्रोणपुत्रस्य अश्वत्थाम्नः प्रतिज्ञेयं यथा-

अस्मिन् शस्त्रसङ्कुले संयुगे पाण्डवानां सैन्येषु यः कश्चिद्वा निजदोर्दण्डपाण्डित्य-गर्वितात्मा शस्त्रास्त्रधारणधुरीणः भवतु, तथा पाञ्चालवंशे बालो वा युवको वा उत गर्भशय्याश्रितो भ्रूणो वा भवतु, पुनरत्र युद्धक्षेत्रे अहमस्मीति विदित्वापि मत्पितुः संहारविधिं मौनेन यो ददर्श, यश्चानुमेने, यो वा चकार विरोधी भवतु, यदि मत्प्रतिपक्षे

साक्षाद्धर्मदण्डधरः परेतपरिवृढो(यमराजो) वा भवतु,मत्पितृमरणशोकसन्तापविदीर्णहृदयः कोपारुणजडीभूतस्वान्तोऽहं सर्वस्यापि प्रतीकारपाथेयप्रियः स्वयं मृत्युदेव एव स्याम्।

**वृत्तिः- अत्र क्रूरक्रोधस्थायिभावात्मकस्योन्निद्ररौद्ररसस्योचिता शिशुस्थविर-गर्भगतविषसननिस्त्रिंशकर्माध्यवसायाधिरोहणसंवादिनी द्रोणवधविधुरामर्शविषविषमव्यथा कश्मलशिथिलमश्वत्थाम्नः स्थेमानं प्रतिज्ञापयति।**

**व्याख्या-** अत्र श्लोकेऽस्मिन् परुषतरक्रोधस्थायिभावात्मकस्य स्फूर्जदूर्जितरौद्ररसस्य सदृशी बालयुवकस्थविरगर्भाशयभ्रूणहननकर्मणि खड्गसञ्चालनव्यापारप्रसक्ता, स्वपितु-र्द्रोणाचार्यस्य निधनोत्पन्नक्रोधजन्या, विषमिव नितान्तविषमा, या च व्यथा द्रोणपुत्रस्य अश्वत्थाम्नः मोहवशंवादिमनोदैन्यस्थितिं स्फुटमनुभावयति, सैव सहृदयतल्लजेषु अननुभूतपूर्वां काञ्चिदनिर्वाच्यां शौर्योत्कर्षोज्जृम्भितमनोमोदमहत्ताम् आदधाति।

प्र. अत्र अश्वत्थामा किमर्थं क्रुद्धः?

उ ..........................................................................................................

............................................................................................................

## 3.3.8रौद्ररसगतमनौचित्यम्

**न तु यथा श्रीप्रवरसेनस्य-**

दणुइन्द्ररुहिरलग्गे जस्स फुरन्ते णहप्पहाविछडे।

गुप्पन्ती विवलाआ गलिअब्बथणंसुए, महासुरलच्छी।।

**[दनुजेन्द्ररुधिरलग्ने यस्य स्फुरन्ति नखप्रभासमूहे।**

**व्याकुलीभवन्ती विपलायिता गलितस्तनांशुका महासुरलक्ष्मीः।।]**

**व्याख्या-** रौद्ररसगतमनौचित्यं विचर्चितुं श्रीप्रवरसेनस्य श्लोकमिममुपस्थापयति। प्रह्लादपरित्राणपरायणस्य हिरण्यकशिपुसूदनस्य भगवतो नृसिंहस्य वर्णनमिदम्।

दैत्यराजस्य हिरण्यकशिपोः वक्षस्थलच्छेदनानन्तरं तद्गतरुधिरधाराभिः परिव्याप्तं नृसिंहदेवस्य कररुहतेजोराशिं वीक्ष्य भयविह्वला असुरसाम्राज्यलक्ष्मीः निलीना। अर्थात् भगवतो नृसिंहदेवस्य प्रलयभयङ्करघोरप्रतापाकृतिं दृष्ट्वा असुरसाम्राज्यं कलकलितमिति भावः।

**वृत्तिः- अत्र क्रोधव्यञ्जकपदविरहिततया "दनुजेन्द्ररुधिरलग्ने यस्य स्फुरन्ति नखप्रभासमूहेव्याकुलीभवन्ती विपलायिता गलितस्तनांशुका महासुरलक्ष्मीः" इति वर्णनया रुधिरलग्न इति बीभत्सरससंस्पर्शो व्याकुलीभवन्ती दैत्यश्रीः पलायितेति भयानकरससङ्करेण प्रकृतोचितप्रधानभूतस्य रौद्ररसस्य क्वचिन्मुखमपि न दृश्यते।**

**व्याख्या-** श्लोकेऽस्मिन् क्रोधाभिव्यञ्जकपदानां अत्यन्ताभावेन "दनुजेन्द्ररुधिरलग्ने यस्य स्फुरन्ति नखप्रभासमूहे"इत्याकारकबीभत्सरसस्य, पुनः "व्याकुलीभवन्ती महासुरलक्ष्मीः पलायिता" इत्याकारकभयानकरसस्य च सन्नियोगात्प्रकृतप्रसङ्गे प्राधान्येन विवक्षितो रौद्ररसः स्वकीयसत्तामहत्त्वां न क्वापि रक्षितुं समर्थो जातः। बीभत्सभयानकयोः रसयोराभ्यन्तर्ये प्रकृतरौद्ररसस्य न क्वापि स्थितिरुदेति इति भावः।

प्र. अत्र रौद्ररसस्य अनौचित्यकारणं किम् ?

उ ..........................................................................................................

..........................................................................................................

## औचित्यविचारचर्चा – तृतीयाध्यायप्रश्नाः

01. शृङ्गाररसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

02. हास्यरसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

03. करुणरसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

04. रौद्ररसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

•••

# औचित्यविचारचर्चा – चतुर्थोऽध्यायः

## संरचना

4.1 प्रस्तावना

4.2 उद्दिष्टाधिगमविशेषाः

4.3 वीररसौचित्यम्

4.4 वीररसगतमनौचित्यम्

4.5 भयानकरसौचित्यम्

4.6 भयानकरसगतमनौचित्यम्

4.7 बीभत्सरसौचित्यम्

4.8 बीभत्सरसगतमनौचित्यम्

4.9 अद्भुतरसौचित्यम्

4.10 अद्भुतरसगतमनौचित्यम्

4.11 शान्तरसौचित्यम्

4.12 शान्तरसगतमनौचित्यम्

## 4.1 प्रस्तावना

तृतीयाध्याये शृङ्गारहास्यकरुणरौद्रगतत्वेन स्थितस्य औचित्यस्य अनौचित्यस्य च विस्तरेण विमर्शनं विधाय साम्प्रतमस्मिन् चतुर्थेऽध्याये वीरभयानक-बीभत्साद्भुतशान्तरसानामौचित्यमनौचित्यञ्च सोदाहरणं सविमर्शं परिशीलयितुं प्रकरणमारभ्यते।

## 4.2 उद्दिष्टाधिगमविशोषाः

- वीररसगतमौचित्यमनौचित्यञ्च सविमर्शोदाहरणमभिज्ञायते।
- भयानकरसगतमौचित्यमनौचित्यञ्च सविमर्शोदाहरणमभिज्ञायते।
- बीभत्सरसगतमौचित्यमनौचित्यञ्च सविमर्शोदाहरणमभिज्ञायते।
- अद्भुतरसगतमौचित्यमनौचित्यञ्च सविमर्शोदाहरणमभिज्ञायते।
- शान्तरसगतमौचित्यमनौचित्यञ्च सविमर्शोदाहरणमभिज्ञायते।

## 4.3 वीररसौचित्यम्

**वीरे यथा मम नितिलतायाम्-**

**शौर्याराधितभर्गभार्गवमुनेः शस्त्रग्रहोन्मार्गिनः**
**संक्षेपेण निवार्य संक्षयमयीं क्षत्रोचितां तीक्ष्णतां।**
**आकर्णायत कृष्टचापकुटिलभ्रूभङ्गसंसर्गिणा**
**येनान्यायनिषेधिना शममयी ब्राह्मी प्रदिष्टा स्थितिः।।**

**व्याख्या-** अत्र वीररसगतमौचित्यं निर्वर्णयितुं क्षेमेन्द्रः स्वीयनीतिलतानामक-काव्यात् श्लोकमिममुदाहरति।

**प्रसङ्गपूर्वरङ्गम्-** युद्धभूमौ भगवतः श्रीरामचन्द्रस्य अनन्यसाधारणपराक्रमसम्पत्ति-मालोक्य रावणचाटुकारौ शुकसारणौ तदन्तिकमुपेत्य पूर्वदृष्टरामस्य शौर्योत्कर्षं वर्णयतः। तत्प्राकरणिकोऽयं श्लोकः।

शस्त्रग्रहणं महर्षिभिः ब्राह्मणवर्णे निषिद्धं कर्म। तदेव कर्म कुर्वन् कुपथगो मुनिवरः परशुरामः निजपराक्रममहसा भगवन्तं शिपिविष्टं प्रसादयामास। तादृशस्य (पराक्रमेण

जगद्विख्यातस्य) विनाशकारिणीं क्षात्रतेजस्वितां समासतो विनिवार्य, आकर्णदीर्घसमाकृष्टधनुराकारकवक्रभ्रुकुटीभङ्गसम्बन्धी, अधर्मनिषेद्धा यो रामः तस्मै शान्तिमयीं ब्राह्मणोचितां मर्यादामुपदिदेश। स एवायं रामः। अर्थात् वीराणामपि शौर्यहन्ता पराक्रममहाधनः श्रीराम इति शुकसारणयोरभिप्रायः।

**वृत्तिः- अत्र "सोऽयं राम" इति रावणाग्रे शुकसारणाभ्यां दूरान्निर्दिश्यमानस्य निस्संरम्भगम्भीरावष्टम्भसंभाव्यमानप्रभावोचितायां शस्त्रसंग्रहोन्मार्गगामिनो भार्गवस्य मुनेः स्वजातिसमुचितस्थित्युपदेशे सति प्रभविष्णुतायां चापरूपभङ्ग्या भ्रूभङ्गः प्रदर्शितः। न तु स्वाभाविकः। वीरस्य क्रोधे विकारासम्भवात्। प्रसन्नमधुरधीरा हि वीरवृत्तिः। तदुचितमत्राभिहितं भार्गवाभिभवेन च प्रधाननायकस्योत्कर्षः प्रतिपादितः।**

**व्याख्या-** शुकसारणौ रावणमुपाश्रित्य पूर्वदृष्टरामपराक्रममेवमभिवर्णयतः। आवाभ्यां पूर्वदृष्टो रामः एवंविधगुणसम्पन्नो वर्तते स्म।सोऽयं रामः अनन्यसाधारणपराक्रमधनो यदा परशुरामस्य ब्राह्मणप्रतिकूलशस्त्रास्त्रविधानादिकर्म दृष्ट्वा, एतदनुचितमिति निश्चित्य, तस्य गर्वभङ्गं विधाय, तस्मै ब्रह्मनिष्ठां शान्तिमयीं स्थितिमुपदिदेश। तदा भार्गवरामः शस्त्रास्त्रजातं तृणाय मत्वा महातपस्समाधिसम्पन्नो बभूव। यदा श्रीरामः परशुरामगर्वभङ्गादिघनकार्याणि विदधौ, तदा न कश्चिदपि रामस्य पूर्वकल्पितोऽभ्यासविधिरासीत्। न वा किञ्चिन्मन्त्रणमुपायानाम्। न च काचित्सज्जा शस्त्रास्त्रपटलीनाम्। रामस्तु प्रकृतिगम्भीरः न किञ्चिदपि दौर्बल्यं तस्य व्यवहारे लक्षितम्। एवं श्रीरामचन्द्रस्य महाशूरोचितप्रभावगरिमा सुव्यक्तः सम्पन्नः।कृष्टचापकुटिलभ्रूभङ्ग-वर्णनमपि नितारामौचित्यदृष्ट्या साधुतरमास्ते। यतः भ्रूभङ्गस्तु क्रोधजन्यः कश्चिद्विकारः। शूराणां क्रोधस्तु विकारशून्यः प्रसिद्धः। रामस्य क्रोधः वीरसदृशो निर्विकार एवेति वक्तुं धनुषः कौटिल्यमेव औपम्येन गृहीतम्। वीराणां प्रवृत्तिरेवंविधैव प्रसन्नमधुरगभीरा।

एतत्सर्वमस्मिन् पद्ये सम्यगभिवर्णितम्। परशुरामसदृशमहायोधाग्रगण्यस्य लोकोत्तरशौर्य-लक्ष्मीवल्लभस्यापि पराभववर्णनेन तत्प्रत्यर्थिनः श्रीरामभद्रस्य शौर्यभास्वत्प्रभाराजिः सर्वतो राराज्यतेतराम्।

| |
|---|
| प्र. श्रीरामपराक्रमस्य लोकोत्तरत्वकारणं किम् ? |
| उ ........................................................................................ |
| .......................................................................................... |

## 4.4 वीररसगतमनौचित्यम्

**न तु यथा भवभूतेः-**

**वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्ततां**
**युद्धं स्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते।**
**यानि त्रीण्यकुतोमुखान्यपि पदान्यासन्खरायोधने**
**यद्वा कौशलमिन्द्रसूनुदमने तत्राप्यभिज्ञो जनः।।**

**व्याख्या-** वीररसगतमनौचित्यं विचारयितुं भवभूतेरुत्तररामचरितनाटकात् श्लोकमिममुदाहरति।

**प्रसङ्गपूर्वरङ्गम्-** लवचन्द्रकेत्वोरभ्यन्तरे सम्प्रवृत्तविवादसमये चन्द्रकेतोरुत्तरमाकर्ण्य लवकुमारो रामचरितमपहसन्नेवं भाषते।

रघुकुलशिरोमणयः श्रीरामभद्रास्तु वृद्धाः।अतस्तेषां विषये अस्मादृशसामान्य-पामरवचनानि नितरामसम्बद्धानि।पुनस्तेषां कीर्तिगानं किं वा करणीयम्? ते तु तथा भवन्तु नाम । परन्तु लोके महाजनदृष्ट्या स्त्रीहत्या अत्यन्तं कुत्सनीया। तथापि सुन्ददयितां ताडकामावहे हत्वा, ते अपूर्वलभ्यां कीर्तिमवापुः। एतदतीव विचित्रम्!पुनर्यदा खरेण सह

युद्धं प्रवृत्तम्। तदा मुखमपराङ्मुखीकृत्य स्थितम्, परन्तु त्रीणि पदानि पृष्ठतो निहितानि। किमेतन्महाशूरस्य लक्षणम्! तथा पुनरिवालोक्यताम्। इन्द्रपुत्रेण वालिना युद्धसन्दर्भे यत्पाण्डित्यं (क्वचिदात्मानं निगूह्य पृष्ठतः शस्त्रत्यागः) रामेण दर्शितम्, ततः को वा अपरिचितस्स्याल्लोके? सर्वोऽपि रामचरित्रमत्यन्तमभिजानाति। अतस्त्वं रामगुणकीर्तनं हित्वा, मया सह युध्यस्वेति भावः।

**वृत्तिः-अत्राप्रधानस्य रामसूनोः कुमारलवस्य परप्रतापोत्कर्षासहिष्णोर्वीररसोद्दीपनाय सकलप्रबन्धजीवितसर्वस्वभूतस्य प्रधाननायतगतस्य वीररसस्य ताडकादमन-खररणापसरणान्यरणसंसक्तवालिव्यापादनादिजनविहितापवादप्रतिपादनेन स्ववचसा कविना विनाशः कृत इत्यनुचितमेतत्।**

**व्याख्या-** श्लोकेऽस्मिन् स्वात्मनो भिन्नस्य कस्यचिदन्यस्य पराक्रममसहमानस्य प्रकृतमप्रधानस्य रामपुत्रस्य लवकुमारस्य वीरतासमुत्कर्षदर्शनार्थम्,साक्षात्प्रबन्धजीवातु-भूतस्य प्रधाननायकस्य श्रीरामभद्रस्य शूरतायाः ताडकारूपस्त्रीदमन-खरयुद्धे पदत्रयाप-सरण–सुग्रीवयुद्धप्रसक्तशक्रपुत्रवालिनः कपटहननादिरूपलोकनिन्दया कविः भवभूतिः स्वशब्दैरेव प्रबन्धचमत्कृतेः विनाशमकार्षीत्। अतो वीररसप्रसङ्गे

| |
|---|
| प्र. लवस्य वचनेषु श्रीरामशौर्यशङ्कायां कारणं किम् ? |
| उ ........................................................................................ |
| ........................................................................................ |

प्रस्तुतमिदमुदाहरणंनितरामनौचित्यं द्योतयति।

## 4.5 भयानकरसौचित्यम्

**भयानके यथा श्रीहर्षस्य-**

**कण्ठे कृत्तावशेषं कनकमयमधःश्रृङ्खलादाम कर्षन्**

**क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः।**

**दत्तातङ्कोऽङ्गनानामनुसृतसरणिः सम्भ्रमादश्वपालैः**

**प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः।।**

**अपि च-**

**नष्टं वर्षवरैर्मनुष्यगणनाभावादकृत्वा त्रपा-**

**मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः।**

**पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं**

**कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किणः।।**

**व्याख्या-** भयानकरसौचित्यं निरीक्षितुं महाकविश्रीहर्षदेवस्य रत्नावलीनाटिकातः श्लोकद्वयीमिमामुपस्थापयति। पशुशालायां बन्धनमुज्झित्वा अन्तःपुरं प्रविशतः कस्यचिद् वानरस्य वर्णनमिदम्।

पशुशालायां बन्धनच्छेदसमये कण्ठे किञ्चिदवशिष्टेन सुवर्णनिर्मितेन बन्धनपाशेन भूमौ सर्वत्र विलिखन्, अतीवलीलया चञ्चलचरणप्रसक्तरणरणध्वनियुक्तक्षुद्रघण्टिका-समुदायवान् स वानरः द्वाराणि देहलीः सत्वरमतिक्रम्य, वाजिरक्षकैः कृतानुगमनो बहुधा विनिवार्यमाणोऽपि पशुशालातः कथमपि बहिरागतोऽयं पुरोवर्ती प्लवङ्गः उत्सवार्थं समवेतानाम् अन्तःपुरस्त्रीणां भयमुत्पादयन् अन्तःपुरमाविशति।

पूर्ववर्णितवानरप्रवेशजन्यभयप्रतिक्रियास्वरूपान्तःपुरसम्भ्रान्ततां प्रदर्शयितुमाह। यथा पुनरपि च - - -

मनुष्येषु विशिष्य पुरुषेषु संख्यानस्याभावात् क्लीबो न पुमानिति हेतोश्च पलायनजन्यलज्जामुत्सृज्य भयान्नपुंसकाः पलायनपरायणाः संवृत्ताः। पुनश्च

खर्वाकृतिर्वामनः कञ्चुकिनो वृद्धब्राह्मणस्य चेलाभ्यन्तरे त्रासेन प्रविवेश। पुनरेते किराताः स्वनामसदृशमाचरन् ।"किरं प्रान्तदेशमतति गच्छतीति किरातः" इति व्युत्पत्त्या ते नगरपर्यन्तप्रदेशमाश्रयन्तीत्यर्थः।वानरोऽस्मान् दृष्ट्वा उद्वेजयेदित्याशङ्क्य कुब्जाः प्रकृतिवामनाः भीत्या कलेवरं नम्रीकृत्य बहिरपासरन्।एवमत्र क्लीबवामनकिरातकुब्जाः स्वस्वप्रकृत्यनुरूपं यथावकाशं वानरादात्मानं गोपयितुं यत्नवन्त आसन्निति भावः।

**वृत्तिः- अत्राङ्गनानां निशितदशननखशिखोल्लेखातङ्कदानेन प्रचुरतरवानराभिसरण-भयसम्भ्रान्तान्तःपुरिकवृद्धवामनकिरातकुब्जादीनां पुरुषगणनाविहीनतया धैर्यविरहकातरा-नामुचितचेष्टानुभाववर्णनया भयानकरससंवादरुचिरौचित्यमाचकास्ति।**

**व्याख्या-** पद्यद्वयेऽस्मिन् नारीणामुद्वेगं जनयितुं तीव्रतरदन्तकररुहादि-शिखरतीक्ष्णताप्रसङ्गेण सत्वरं काकतालीयन्याय्येन उपर्यापततो वानरापसदाद् भयविह्वलानामवरोधवासिनां स्वात्मनः पुरुषेषु न कलयतां क्लीबानां निर्लज्जपलायनेन, वामनानां वृद्धब्राह्मणचेलाभ्यन्तरप्रवेशेन, किरातानां नगरपर्यन्तप्रदेशाश्रयणेन, कुब्जानां शरीरमवनमय्य अपसरणेन च प्रकृत्यनुरूपचेष्टावत्त्वं सुव्यक्तमेव। एभिरनुभावैः भयानक-रसानुरूपमनोहरचमत्कारचारुताभित्तिः सहृदयचेतसि दृढमूलतया स्वाद्यतामाधत्त इति भावः।

| |
|---|
| प्र. अत्र भीतानां क्लीबवामनादीनां चेष्टितेषु औचित्यमुपदर्शयत ? |
| उ .................................................................................................. |
| .................................................................................................... |

## 4.6 भयानकरसगतमनौचित्यम्

**न तु यथा राजपुत्रमुक्तापीडस्य-**

**नीवारप्रसराग्रमुष्टिकवलैर्यो वर्धितः शैशवे**

**पीतं येन सरोजपत्रपुटके होमावशेषं पयः।**

**तं दृष्ट्वा मदमन्थरालिवलयव्यालोलगल्लं गजं**

**सानन्दं सभयञ्च पश्यति मुहुर्दूरे स्थितस्तापसः।।**

**व्याख्या-**भयानकरसगतमनौचित्यमाचेतुं राजपुत्रमुक्तापीडस्य श्लोकमिममुदाहरति।

प्रकृत्या निष्कपटः भूतदयालुः कश्चित् तपोधनः तृणधान्यानां कोमलाग्रभागानां मुष्टिमितग्रासान् प्रेम्णा भक्षयित्वा यं गजशावकं पोषयामास, पुनश्च यं अग्निहोत्रा-वशिष्टपवित्रजलानि कमलपुटेषु सम्भृत्य पाययामास, तमेव प्रकृत्याभोगान्मदमेदुर-द्विरेफश्रेणीकल्लोलितगण्डस्थलं पूर्णतारुण्यश्रियं मत्तमातङ्गजं दूरादेव पुत्रवत्परिपालित-त्वात् सामोदम्, मदजाड्येन मामप्यविकलयन् कदाचिद् निहन्यादिति भीत्या च विलोकय-न्नवतिष्ठते।

**वृत्तिः- अत्र गजस्याघातविकृतचेष्टानुवर्णनाविरहिततया स्थायिभावस्य भयानुभाव-वर्जितस्य केवलं नाममात्रोदीरणेन च भयानकरसोचितसंभ्रमाभावादुपचितमौचित्यं न किञ्चिदुपलभ्यते।**

**व्याख्या-** श्लोकेऽस्मिन् भयानकरसापेक्षया वात्सल्यरसप्रतीतिरतीवचमत्कारिणी वर्तते। परन्तु भयानकरसदृष्ट्या अत्र गजस्य न क्वचिदपि व्याघातकक्रूरचेष्टादिवर्णनमस्ति। भयरूपस्थायिभावस्य केवलनाममात्रोल्लेखेन, तदनुरूपानुभावसञ्चारिभावादिवर्णनाभावाद् भयस्थायिभावः भयानकरसरूपतां न प्राप्तः।अतोऽत्र भयानकरसप्रतीतेः ईशदपि निरवकाशितया तदीयचारुतानुभवेन सचेतसो वञ्चिताः।

| |
|---|
| प्र. अत्र वात्सल्यरसप्रतीत्या भयानकरसस्य हानिः कथं जाता ? |
| उ ......................................................................................................... |
| ......................................................................................................... |

## 4.7 बीभत्सरसौचित्यम्

**बीभत्से यथा मम मुनिमतमीमांसायाम्-**

**सर्वापायचयाश्रयस्य नियतं कुत्सानिकायस्य किं**
**कायस्यास्य विभूषणैः सुवसनैरानन्दनैश्चन्दनैः।**
**अन्तर्यस्य शकृद्यकृत्कृमिकुलक्लोमान्त्रमालाकुले**
**क्लेदिन्यन्तदिने प्रयान्ति विमुखाः कौलेयकाका अपि।।**

**व्याख्या-** बीभत्सरसगतमौचित्यं निदर्शयितुं क्षेमेन्द्रः स्वकीयमुनिमतमीमांसा-ग्रन्थात् श्लोकमिममवतारयति।

किमात्मकमिदं शरीरम्?इति चेदुच्यते। पुञ्जीभूतसमस्तदोषाणामेकमात्राश्रयः, पुनर्निश्चितं निन्दासंस्थानमिदम्। अत ईदृशघृणास्पदस्य शरीरस्य भूषणकुसुमदुकूलादि-वस्त्रकस्तूरिचन्दनादिभिरनर्घद्रव्यजातैः विमण्डनेन किम्प्रयोजनम्? सर्वं व्यर्थम्। अवसानसमये मलमूत्रयकृत्क्लोमकीटान्त्रमालासमवायेन परिव्याप्तं पापपङ्किलं शरीरमिदं दृष्ट्वा श्वानः, काका अपि दौर्गन्ध्यात् विमुखा भवन्ति।

**वृत्तिः- अत्र वैराग्यवासनाच्छुरितबीभत्सरसस्य जुगुप्सास्थायिभावोचितकायगत-कुत्सिततरान्त्रतन्त्रादिसमुदीरणेन परा परिपुष्टिनिःसारशरीराभिमानवैरस्यजननी प्रतिपादिता।**

**व्याख्या-** श्लोकेऽस्मिन् जुगुप्सारूपस्थायिभावस्य आनुरूप्येण शरीरनिष्ठनिन्द-नीयतरान्त्रतन्त्रादिकथनात् वैराग्यवासनासंवलितस्यबीभत्सरस्य सारहीनशरीरगर्वभञ्जिनी काचिदपूर्वा परिपोषसरणिरुद्घाटिता। अनेन बीभत्सरसस्य वास्तविकमानन्दमनुभावयितुं सहृदयानयं श्लोकः कुशलस्संवृत्तः।

प्र. मनुष्यशरीरं कीदृशमस्ति ?

उ ..........................................................................................................

..............................................................................................................

## 4.8 बीभत्सरसगतमनौचित्यम्

**न तु यथा चन्द्रकस्य-**

**कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलः**

**क्षुधाक्षामो रूक्षः पिठरककपालार्दितगलः।**

**व्रणैः पूतिक्लिन्नैः कृमिपरिवृतैरावृततनुः**

**शुनीमन्वेति श्वा तमपि मदयत्येष मदनः।।**

**व्याख्या**-बीभत्सरसगतमनौचित्यं निरूपयितुं चन्द्रककवेः श्लोकमिममुदाहरति।

समस्तमिमं संसारं मदमत्तं विचारहीनञ्च विधातुं पञ्चबाणस्य निस्सीमः पराक्रमो वर्तते। निभालयन्तु तावदस्य शुनकस्य दुर्दशाम् । स्वयमयं दुर्बलः, पादविहीनः, एकनेत्रविहीनः, कर्णरहितः, छिन्नलाङ्गूलश्च। पुनर्न तावदेव बुभुक्षापीडितः, स्नेहरहितः (शुष्क इत्यर्थः), कपालगलादिव्याधिग्रस्तः, महादुर्गन्धयुक्तैः कृमिकीटनिलयैः व्रणैः परिवृतशरीरोऽपि शुनकोऽयं शुनकीमनुधावति। विषयवासनापरिशान्तये तामनुगच्छतीत्यर्थः।प्रद्युम्नः ईदृशदुर्दशापन्नं शुनकमपि न जहाति।

**वृत्तिः- अत्राशुचिचर्वणरुचेरुपचितविचिकित्साकुत्सानिकायस्य स्वभावजुगुप्सित-योनेः शुनकस्य किमेतैर्बीभत्सविशेषणैरतिशयनिर्बन्धानुबद्धैरधिकमुद्भासितम्। एतैरेव पुरुषगतैर्जुगुप्सा परं गौरवमावहति।**

**व्याख्या-** श्लोकेऽस्मिन् अतिनिकृष्टपदार्थभोजिनो विवृद्धाश्चर्यनिन्दानिलयस्य प्रकृतिदुष्टस्य विनिन्द्यजातिसमुत्पन्नस्य कस्यचित् कुक्कुरस्य ईदृशनिन्दाद्योतकविशेषणानां प्रयोगेन कविः किं फलमवापेति? न वयं जानीमः। सर्वं निष्फलमेव। किमस्त्यत्र? निन्दितानां स्वभाव एव ईदृशः। यदि एवंविधवर्णनं कस्यचिन्मनुष्यस्य विषये कृतञ्चेद् बीभत्सरसस्य समुचितमुदाहरणं स्यात्। कविना न तु तथा विहितम्। अतः कृतिरियं निन्दनीया सती सहृदयानां दूषणपात्रं जाता।

| |
|---|
| प्र. अत्र बीभत्सरसगतत्वेन अनौचित्यस्य किं बीजं दर्शितम्? |
| उ ................................................................................................ |
| ................................................................................................... |

## 4.9 अद्भुतरसौचित्यम्

**अद्भुते यथा चन्द्रकस्य-**

**कृष्णेनाम्ब! गतेन रन्तुमधुना मृद् भक्षिता स्वेच्छया**
**सत्यं कृष्ण! क एवमाह मुसली मिथ्याम्ब! पश्यानन्म्।**
**व्यादेहीति विकासितेऽथ वदने दृष्ट्वा समस्तं जग-**
**न्माता यस्य जगाम विस्मयपदं पायात्स वः केशवः।।**

**व्याख्या-** अद्भुतरसगतमौचित्यं निश्चेतुं चन्द्रककवेः श्लोकमत्र प्रस्तौति। भगवतः श्रीकृष्णस्य शैशवलीला अत्र वर्णिता।

कृष्णाग्रजो बलरामः कदाचिदुभयोः क्रीडनसमये कृष्णं मृत्तिकाभक्षिणं दृष्ट्वा मातुरुपकण्ठे ब्रवीत्येवम्।

बलरामः – अम्ब! अद्य खेलनसमये कृष्णः यथेच्छं मृदमभक्षयत्।

यशोदा – किं सत्यं कृष्ण! अद्य त्वया मृत्तिका भक्षिता ?

कृष्णः – भवतीं को वा एवमभाणीत् ?

यशोदा – त्वदग्रजो बलरामः।

कृष्णः – असत्यमुक्तं तेन। यदि सन्दिहसि चेद् मे मुखमालोकय।

यशोदा – तर्हि तथा, मुखं विवृणु।

एवं मातुर्वचनेन यदा श्रीकृष्णः मुखं विववार, तदा तस्य मुखे समस्तमपि ब्रह्मण्डमालोक्य नितरां सा विस्मयार्णवे निममज्ज। तादृशः स भगवान् सर्वभूतान्तरात्मा वासुदेवः युष्मानस्मान् सर्वानपि सर्वदा पातु।

**वृत्तिः- अत्र पाण्डुराङ्गकरसाक्षिलक्षितमृद्भक्षणाक्षेपोद्यतजननीभयचकितस्यापह्नव-कारिणः शिशोर्विकसितास्यस्यान्तः समस्तजगद्दर्शनेन मातुश्च तत्प्रभावानभिज्ञतया वात्सल्यविह्वलाया विस्मयगमनेनात्युचितोऽयमद्भुतातिशयः।**

**व्याख्या-** श्लोकेऽस्मिन् माता यशोदा निजपुत्रस्य श्रीकृष्णस्य करचरणाद्यवयवेषु लग्नां मृदमालोक्य, अयमवश्यमद्य "मृदमघसदिति" निश्चित्य तं प्रष्टुमारेभे। तदा मातुस्त्रासकारणात् तमपराधं निगूहितुकामः स निजास्यं यदा विवृत्य दर्शयामास, तदा तत्र समस्तमपि ब्रह्माण्डमालोक्य माता विस्मयार्णवमग्ना जाता। निर्मायिका माता तु श्रीकृष्णस्य प्रभावं पुत्रवात्सल्यधिया अनभिजानती आश्चर्यमवाप। अनेनात्र समुचितविभावादिसन्निवेशेन अद्भुतरसः परिपोषमितः सकलसहृदयमनस्संवादसुन्दरास्वादमधुरिमाणमञ्चति।

| |
|---|
| प्र. श्लोकेऽस्मिन् अभिवर्णितसन्निवेशो अद्भुरसौचित्यस्य कारणं किम् ? |
| उ ........................................................................................ |
| ........................................................................................ |

## 4.10अद्भुतरसगतमनौचित्यम्

**न तु यथा मम मुनिमतमीमांसायाम् –**

**समस्ताश्चर्याणां जलनिधिरपारस्स वसति-**
**स्ततोऽप्याश्चर्यं यत्पिबति सकलं तं किल मुनिः।**
**इदं त्वत्याश्चर्यं लघुकलशजन्मापि यदसौ**
**परिच्छेत्तुं को वा प्रभवति तवाश्चर्यसरणिम्।।**

**व्याख्या-** अद्भुतरसगतमनौचित्यं प्रदर्शयितुं क्षेमेन्द्रः स्वलिखितमुनिमतमीमांसा-नामकग्रन्थात् श्लोकमिममुपस्थापयति।

प्रपञ्चेऽस्मिन् सर्वेषामाश्चर्याणामेकमायतनं प्रसिद्धं वर्तते, स भवति निष्पारो रत्नाकरः। पुनस्ततोऽपि विस्मयकरोऽयं विषयो यत्तं समस्तमपि जलधिमेकवारमाचमनेन पपौ महामुनिरगस्त्यः। पुनरितोऽपि सर्वस्मादाश्चर्यतमोऽयं विषयो यत्स महामुनिः पार्थिवकुम्भादाविरभवत्। हे जगत्प्रभो!लोकेऽस्मिन् तव लीला अनिर्वाच्या। अतः को वा त्वदीयामिमामाश्चर्यपरम्परां परिमातुमर्हति ?

**वृत्तिः- अत्रापारसरित्पतिप्रभावेन मुनिना तस्यैकचुलुकाचमनेन मुनेश्च लघुकलशजन्मना क्रमाक्रान्तिसमारूढोऽप्यसमविस्मयमयोऽयमद्भुतप्रसरः। संसारस्यै-वंविधैवाश्चर्यसरणिरपरिच्छिन्ना न किञ्चिदेतत्कौतुकमित्यर्थान्तरन्याससामर्थ्येन सहसैवाव-रोपित इव तिरोभूततामुपगतः।**

**व्याख्या** – श्लोकेऽस्मिन् समस्ताश्चर्याणां जलनिधिरेकमायतनमिति कथनात् जलधेर्महिमा व्यक्तः। तमपि जलनिधिं केवलमेकेनाचमनेन पपौ मुनिरगस्त्य इति कथनात् मुनेर्महिमा व्यक्तः। ततःपरं सोऽपि मुनिः पार्थिवलघुकलशादुदभूदिति कथनेन

कलशप्राशस्त्यं व्यक्तम्।एवं क्रमेण उत्तरोत्तरस्य एकैकस्य महिमा पूर्वत उत्कृष्टोऽपि संवृत्तः। एवं क्रमोत्कर्षेण विस्मयस्थायिकस्याद्भुतरसस्य योऽयमङ्कुरः समजनि, सोऽपि संसारेऽस्मिन् एवंविधाश्चर्यपरम्परान काचिन्नूतनी, नात्र विस्मयस्य कश्चिदवकाश इत्याकारकार्थान्तरन्यासेन (पूर्ववर्णितविषयस्य समर्थनार्थमुत्तरस्य विषयान्तरेण)झटिति तिरस्कृतो जातः। अर्थात् संसारमनया आश्चर्यपरम्परया को वा मापयितुं क्षमः? इत्याकारकार्थव्यक्तिर्यदा जायते, तदा पूर्ववर्णितविषयाणां सर्वेषामपि महिमा विनष्टः। एवमीदृशेन अनौचित्येन अद्भुतरसः निजचारुताविशेषादपभ्रष्टः सन् निर्जीव इवावभासते।

| |
|---|
| प्र. अत्र चतुर्थपादे अद्भुतरसानौचित्यस्य किं कारणमुक्तम्? |
| उ ........................................................................................................ |
| .............................................................................................................. |

## 4.11 शान्तरसौचित्यम्

**शान्ते यथा मम चतुर्वर्गसङ्ग्रहे –**

**भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं**
**दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयम् ।**
**माने ग्लानिभयं जये रिपुभयं काये कृतान्ताद्भयं**
**सर्वं नाम भवे भवेद्भयमहो वैराग्यमेवाभयम् ।।**

**व्याख्या-** शान्तरसगतमौचित्यं परीक्षितुं क्षेमेन्द्रः निजलिखितचतुर्वर्गसङ्ग्रह-नामकग्रन्थात् श्लोकमिममवतारयति।

असारेऽस्मिन् संसारे न किञ्चिदपि वस्तु एवं दृश्यते, यद् भयविमुक्तं स्यात्। सर्वस्मिन्नपि क्षणे मनुष्यस्य भयमेव सहचरवद्भासते। यदि वयं विलासमयजीवने भोगिनः स्याम तदा तत्र रोगभयम्, सुखमयक्षणे तदवक्षतिभयम्, सम्पदि ज्वलनात् क्षितिपतेर्वा

भयम्, भृत्यकर्मणि यजमानभयम्, गुणे तन्निन्दकभयम्, कुले कुलटास्त्रीभयम्, अभिमाने तद्धानिभयम्, विजये शत्रुभयम्, शरीरे मृत्युभयम्, एवमस्माकं कस्मिन् वा क्षणे भयविरहिता वर्तते? अतो लोके वैराग्यमीदृशं तत्त्वान्तरं वर्तते, यत्र मनुष्यः निर्भयेन परमानन्देन च जीवति। तस्मात्सर्वेषामभयदायि वैराग्यमेव। सर्वैस्तदाश्रित्यैव जीवितव्यम्।

**वृत्तिः- अत्र सकलजनाभिमतभोगसुखवित्तादीनां भयमयतया हेयतां प्रतिपाद्य वैराग्यमेव सकलभयायासशमनमुपादेयतया यदुपन्यस्तं तेन शान्तरसस्य निरर्गलमार्गावतरणमुचिततरमुपदिष्टं भवति।**

**व्याख्या-** श्लोकेऽस्मिन् सर्वमानवानां काम्यविषयत्वेन भोगसुखधनगुणमान-विजयादयः अवसानविरसाः (आदौ सुखजनकाः क्रमेण दुःखप्रदाः) इति हेतोः नितरां हेयाः भवन्ति। पुनर्निरतिशयानन्ददायि शान्तिमयञ्च वैराग्यमात्मसात्कृत्य अध्यात्ममहाप्रस्थाने अग्रगामित्वमासाद्यम्। इदमेव जीवनाभ्युन्नतौ मूलरहस्यम्। रहस्यमिदं वैराग्यशान्तादिपदप्रतिपाद्यं सदस्मिन् श्लोके नितरां हृदयग्राहिशैल्या-मभिवर्णितम्। अतस्समुचितमुदाहरणमिदं शान्तरसस्य।

प्र. अत्र वैराग्यप्रशंसनेन शान्तरसौचित्यं कथमुद्भावितम्?

उ ........................................................................................................

..........................................................................................................

## 4.12 शान्तरसगतमनौचित्यम्

**न तु यथा श्रीमदुत्पलराजस्य-**

**अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा**

**मणौ वा लोष्ठे वा कुसुमशयने वा दृशदि वा।**

**तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः**

**क्वचित्पुण्येऽरण्ये शिवशिवशिवेति प्रलपतः।।**

**व्याख्या-** शान्तरसगतमनौचित्यं विचारयितुं श्रीमदुत्पलराजकवेः श्लोकमत्र समुपस्थापयति।

स्वभावविषमो विषधरः सर्पो वा प्रकृतिकोमलः शीतलपुष्पहारः, सहजप्रतापी रिपुर्वा निसर्गमधुरो वयस्यः, महार्घमणिरत्नजातं वा धूलिकणाः, सहजमृदुलपुष्पशयनं वा कठिनतरप्रस्तरवेदी, निर्मूल्यतृणानि वा मनोहरनारीविलासः, परस्परप्रकृतिविरोधिषु विषयेष्वमीषु समत्वबुद्धेर्मम वासराः कुत्रचित्पवित्रमयनिर्जनतपोवने शिवनामस्मरण-पुरस्सरं व्यतिक्राम्यन्ति। (अत्र लोङ्लकारे व्यतिक्राम्यन्तु इति पाठः समीचीनः)।

**वृत्तिः- अत्र जीवन्मुक्तोचितं प्रियाप्रियरागद्वेषोपशमलक्षणमोक्षक्षमं सर्वसाम्य-महिहारसुहृदरिसमदृष्टिरूपमभिदधता क्वचित्पुण्यारण्ये यदभिहितं तद्विकल्पप्रतिपादक-मभेदवासनाविरुद्धमनुचितमवभासते। धाराधिरूढसर्वसाम्यविगलितभेदाभिमानग्रन्थेर्हि सर्वत्र सर्वं शिवमयं पश्यतस्तपोवने नगरावस्करकूटे च विमलात्मलाभतृप्ततया समानदृशः क्वचित्पुण्यारण्यादिवचनमनुचितोच्चारणमेव ।** 16

**व्याख्या-**अस्मिन् श्लोके जीवन्मुक्तदशासमुचितं प्रियाप्रिययोः रागद्वेषयोःप्रशमन-क्षमं मोक्षानुरूपं समत्वभावानाद्योतकं सर्पहारयोः शत्रुमित्रयोश्च समदृष्टिं प्रतिपादयन् 'क्वचित्पुण्येऽरण्ये' इति यत्कथयति, तद्द्वैतभावनाद्योतकं सदद्वैतभावनाबाधकमनुचित-मत्यन्तं परिणतम्। निर्व्यवच्छिन्नधारावाहिकसाम्यबुद्धिसंवलितस्य विगलितभेदाभिमानस्य सर्वमपि संसारं स्नेहमयेन चक्षुषा वीक्षमाणस्य तपोवननगरदेशादिविषयेऽपि क्वापि भेदबुद्धेः जागृतिरेव नितरामसम्भवा। अतस्तादृशमहात्मनां समत्वाभावनावस्कन्दितचित्तवृत्तीनां

मुखात् 'क्वचित्पुण्येऽरण्ये  मम समदृशो यान्ति दिवसाः' इत्याकारकवचनोपन्यासः न केवलं पवित्रापवित्रादिभेदबुद्धिद्योतक एव, अपि तु तपोवनमर्यादाविरोधी नितरामनुचितो विगुणः। अनेन शान्तरसोऽत्र नितरां बाधितः सन् सहृदयचेतसि खेदमुत्पादयति। 16

| |
|---|
| प्र. अत्र शान्तरसगतत्वेन अनौचित्यकारणं किमभिहितम्? |
| उ ................................................................................................ |
| ................................................................................................... |

••••••

## औचित्यविचारचर्चा - चतुर्थाध्यायप्रश्नाः

01. वीररसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

02. भयानकरसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

03. बीभत्सरसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

04. अद्भुतरसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

05. शान्तरसगतमौचित्यमनौचित्यञ्च सोदाहरणं व्याख्यात ?

●●●